Barcode : 5010010027973
Title - bhaaratiiya raajaniiti prakaasha
Author - Dravida Rajesvar Sastri
Language - Sanskrit
Pages - 82
Publication Year - 1918
Barcode EAN.UCC-13



प्रकाशक
प वसन्त अनन्त गाडगोळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०

सर्वाधिकारा प्रकाशकायत्ता:

मुद्रक
प. वसन्त अनन्त गाडगोळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालय
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

THE KUPPUSWAMY SASTRI 1985
RESEARCH INSTITUTE,
MYLAPORE MADRAS-4

॥ श्रीगुरु शरणम् ॥

Donated by Sri P.V. Subramanya

भारतीय-राजनीति-प्रकाशः ।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वर ।
गुरु साक्षात् परब्रह्म तस्मै श्रीगुरवे नम. ॥

भारतीय-पाश्चात्त्य-राजनीत्यो परस्पर तुलनात्मक-दृष्ट्या विचारे क्रियमाणे इदमेव स्पष्ट प्रतीयते, यत् पाश्चात्त्य-नीतिज्ञाना विचारसरणे अपेक्षया भारतीय-नीतिज्ञाना विचार-पद्धति सर्वप्रकारेण अत्यन्त श्रेष्ठा सर्वाङ्गीणतया पूर्णतमा चेति । अयमेव विचारोऽस्मिन् ग्रन्थे विशेषत प्रस्तुतो वर्तते ।

प्रत्यभिनिवेश त्यक्त्वा अस्मिन् विषये यदि भारतीय-विचार-शैल्या अनुसरण क्रियेत तर्हि इदमप्यवश्य प्रतीयेत, यद् भारतीय-राजनीतौ न केवल पाश्चात्त्य-राजनीते समन्वयोऽस्ति, किन्तु तत्र या या न्यूनता विद्यन्ते तासा सर्वासाम् अपि विचार पुरस्कृत्यैव तन्निवारणोपाया अपि सम्यङ्ग निर्दिष्टा इति ।

तत्र तावन्नीतिस्वरूपज्ञानमेव प्रथमत आवश्यक येन भारतीयाना पाश्चात्त्याना च विचारपद्धत्यो को विशेष इति पाश्चात्त्याभीष्टानामपि फलाना सिद्धि कया रीत्या अवश्य भवितुमर्हतीति च ज्ञायेत ।

नीतेर्लक्षणमिदमेव वर्णित काम-दकीय-नीतिसारटीकायामुपाध्याय-निरपेक्षाम्यास् यत् —

" प्रत्यक्षपरोक्षानमानलक्षण-प्रमाण त्रय-निर्णीतायां
फलसिद्धौ देश-कालानुकूल्ये सति यथासाध्यमुपाय-
साधना विनियोग-लक्षणा क्रिया नीति." इति ।

लक्षणमिदमतीव दूरदर्शिता-सूचकमित्यत्र न कस्यापि वैमत्य भवितुम् अर्हति । केवल शब्द-प्रामाण्यमनुसृत्य क्रियमाणमनुष्ठान धर्म-शब्द-वाच्य भवति । तदेवानुष्ठान यदा प्रत्यक्षानुमानाभ्यामपि हित-साधनता निश्चित्य क्रियते तदा नीतिसज्ञा प्राप्नोति । अतो नीतिर्न धर्ममन्तरा अवस्थिति लभते । प्रत्यक्ष-तर्काभ्यामपि यस्या नीतौ हित-

साधनता निश्चिता, तस्या सदेहादि-मूलकम् अननुष्ठान तु अवश्य विपत्ते कारण भवति ।

उक्त-लक्षणस्य तात्पर्यमिदमेव, यत् नीतौ पूर्वोक्त-प्रमाण-त्रय-समन्वये सत्येव सा चार्वाक-बौद्धास्तिकादि-सर्वसमता भवितुमर्हति नान्यथेति स तत्रावश्यक इति ।

अदृष्टस्य प्रत्यक्ष-विषयत्वम्

अत्रैतादृश-भारतीय-राजनीति-समन्वय अदृष्टस्य प्रत्यक्ष-विषयत्व कथमिति प्रश्न समुपतिष्ठते । तत्रेदमेवोत्तरम् — यद् अदृश्यानामपि पदार्थानामवस्थाविशेषेण प्रत्यक्षत्व सभवतीति । एवमेव प्रतिपादित वेदान्तसूत्र-मुक्तावलि-ग्रन्थे श्रीब्रह्मानन्दसरस्वतीभि **"पञ्चम्यामाहुतावाप पुरुषवचसो भवन्ति"** इति श्रुतिसबद्धाना **"तदन्तर-प्रतिपत्तौ रहति सपरिष्वक्त प्रश्न-निरूपणाभ्याम्"** इत्यादिसूत्राणा व्याख्यानावसरे । **" अग्निहोत्रादिषु शुचितापूर्वक प्रदत्ता पयआदिरूपा आहुतयो भूतसूक्ष्म-रूपेण परिणता एवादृष्टरूपा सत्यो धूमादिमार्गेण सूर्यमण्डल गत्वा सूर्यस्येन्धनकार्यं कुर्वन्ति । ततो वृष्टिरूपेण पृथिवीं प्राप्यान्नादिरूपेण परिणतास्ता एवादृष्टरूपा आहुतय पुरुषशरीर प्रविश्य रस-रक्तादि-धातु-रूपेण परिणता सत्यस्तत स्त्रिया उदर प्राप्य गर्भरूपता गच्छन्ति ।"** इति । अतस्तेन रूपेणादृष्टस्यापि दृश्यत्व भवतीति नीति-लक्षण न कोऽपि दोष । एतदेवोक्त भगवता गीतायामपि —

" तत्र त बुद्धिसयोग लभते पौर्वदेहिकम् " इति ।

अतो यदि नूतन-प्रजासु धारणा-मेधा-बल-पुष्टयादि-गुणाना सग्रहोऽभीष्टस्तर्हि सस्कारादि-द्वारा आहुतीना शुचिता अवश्य सरक्षणीया भवेत् ।

शरीरादिरूपेण दृश्यमानस्य अदृष्टस्य सूक्ष्मरूपमीश्वर-प्रसाद एव यस्य च मायेश्वरेच्छा प्रकृतिरित्यपर नाम । परमेश्वरस्यानेकविधा-स्विच्छासु **" अमुक इद कुर्यादिद न कुर्यात् "** इत्याकारकेच्छाया एव **"शाब्दीभावना"** इति सज्ञा मीमासकानाम् । तस्या बोधो वेद-गत-विधि-

निषेध-वाक्येभ्यो भवति, तत्र तादृश-शाब्दी-भावनाया स्वज्ञानाधीनेष्ट-साधनत्वानुमिति-प्रयोज्यत्व-सबन्धेन आख्यातार्थकृतावन्वय इति तत-सिद्धान्त । अतो मीमासकाना पूर्वोक्त-नीति-लक्षणस्य समन्वयोऽपि धर्मे इष्ट । अय भाव यदि विधि-वाक्येभ्य शाब्दी-भावनामवगत्य अनन्तर तद्विषयत्वेन हेतुना इष्टसाधनत्वमनुमायैव यागादिषु प्रवृत्तिर्भवेत्तर्हि सा धर्मजनिका भवति, इत्येव प्रमाण-त्रयस्यापि समन्वयस्तत्रापेक्षित इति ।

◆ ◆

नीति-समन्वित-धर्मानुष्ठान सर्वसतोषकारकम्

◆ ◆

एतादृश-नीति-समन्वित-धर्मानुष्ठानमवश्य सर्वेषा चित्त-सतोषावह भवतीत्यत्र नास्ति सशय-लेशोऽपि । अत एव —

यान्ति न्याय-प्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थान तु गच्छन्त सोदरोऽपि विमुञ्चति ॥

— इत्यनुभवमूलिका कन्युक्तिरपि सगच्छते ।

अधुना प्रमाणत्रय-समन्वितायामेव नीतौ न कस्यापि विरोधो भवितुमर्हतीत्ययमशो विमृश्यते ।

साप्रत मानव-समाजे यद्यप्यनेके वर्गा समुपलभ्यन्ते तथापि तेषा विशेषतो वर्ग-द्वय एवान्तर्भवि । तत्रैक शब्द-प्रामाण्यवादी केवल-प्रत्यक्षा-नुमान-प्रामाण्य-वादी चापरो वर्ग । एतादृश वर्ग-द्वयमिदानीमेव समुत्पन्नम् इति तु न, किन्तु सृष्टिकालात प्रभृत्येवासीदिति समुपलभ्यते । उक्तवर्ग-द्वयस्यापि स्वस्वशक्त्यनुसारेण देशहित-साधन-दृष्टयैव सदा प्रयत्न प्रचलति । तथा प्रजाना धर्मार्थ-काम-रूप त्रि-वर्ग-समृद्धिरेव लक्ष्यीभूता सर्वेषाम् । तत्र यदि प्रमाण त्रय-सिद्ध-कर्मानुष्ठानेनैवोक्त-लक्ष्य-सिद्धे-रवश्यभाव सिध्येत् तर्हि तस्य सर्वमान्यताया न विवादो भवितुमर्हति । अत एव केवल-प्रत्यक्ष-प्रामाण्यवादिना चार्वाकेणापि " नीति-कामशास्त्रा-नुसारेण वर्तन धर्म । " इति पूर्वोक्त-नीतेरनुसरण कृतम् ।

एवमनुमान-प्रामाण्य-वादिनो बौद्धा अपि वाग्भटादि-वैद्यक-ग्रन्थेषु " वर्णाश्रम-व्यवस्था षोडश-सस्काराश्चार्थ-काम-समृद्धे कारणीभूता । "

इति स्पष्टमुद्घोषयन्ति। यथा भारतीय-राजनीते अनुसरणम् उक्त-वर्ग-द्वयेनापि कृत तथैव यदि साहित्य-शास्त्र-दृष्ट्या अभिनय-पूर्वक तस्या अनुसरण क्रियेत तर्हि पश्वादिभिरपि तादृश-नीति-युक्त-नायकानुगमने आनन्दोऽनुभूयेतेति श्रीरामचन्द्र-चरित्र-दर्शनेन सिध्यति । तेषु तेषु समाजवाद-साम्राज्यवादादिषु दोषमुद्भाव्य ईश्वर-स्वत्व-वाद एव सर्वथा योग्य समाजे शान्ति-व्यवस्थापकश्च भवितुमर्हति इत्येतस्मिन् पक्ष स्वीक्रियमाणे —

सप्त वित्तागमा धर्म्या दायो लाभ क्रयो जय. ।
प्रयोग कर्मयोगश्च सत्प्रतिग्रह एव च ॥

इत्यादि-स्मृत्यादि-वचन-पर्यालोचनया शास्त्रीयोपायै व्यक्तिषु स्वत्व-मुत्पद्यत एवेति कथमीश्वर-स्वत्व-वादस्य शास्त्र-समत्व भवितुमर्हति

प्राप्तस्य सर्वेभ्यः विभज्य दानम् एव योग्यम्

इति प्रश्नो यद्यप्युपस्थापयिष्यते कैश्चित् तथापि श्रीमद्भागवते सप्तमे स्कन्धे नवमाध्याये एवमुक्तमस्ति—

यावद् भ्रियेत जठर तावत् स्वत्व हि देहिनाम् ।
अधिक योऽभिमन्येत स स्तेनो दण्डमर्हति ॥
मृगोष्ट्रखरमर्कोखुसरीसृप् खग-मक्षिका ।
आत्मन पुत्रवत् पश्येत्तैरेषामन्तर कियत् ॥

तट्टीकाया श्रीधरस्वामिन देवाद्दूरिलाभे जातेऽपि तत्राभिमानो न कार्य इत्याह यावदिति। भ्रियेत-पूर्येत, अत एवान्य कमपि स्वगृह क्षेत्र वा प्रविश्य भुञ्जान न निवारयेदित्याह-मृगेति । मर्को मर्कट अतिकृच्छ्रेणा-पाद्य न भजेत् किन्तु यावद्दैव-प्रापित तावदेव भजेत् श्वान-पतिता , अन्ते-वसायिनश्चाण्डालादय तानभिव्याप्य श्रीमद्भगवद्गीतायामपि —

देवान् भावयताऽनेन ते देवा भावयन्तु व ।
परस्पर भावयन्तः श्रेय परमवाप्स्यथ ॥

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव स. ॥
(भ गी ३-११।१२)

श्रीमदुदयनाचार्या अपि-

स्वाम्य यस्य निज जगत्सु जनितेष्वादौ तत पालनम्
व्युत्पत्ते करण हिताहितविधिव्यासेधसभावनम् ।
भूतोक्ति सहजा कृपा निरुपधिर्यत्नस्तदर्थात्मक
तस्मै पूर्णगुरूत्तमाय जगतामीशाय पित्रे नम ॥

यथाहं-कामान् सविभजेत् स्वभोज्याद् विभज्य दद्यात् । एव च नेश्वरो वशीकृत स्याद् इत्याह जह्यादिति । एतेषा वचनाना पर्यालोचने

* *

सर्वहितोपदेशिनी भारतीया राजनीतिः

* *

एतदेव सिध्यति यत् तेषा स्वत्वोपायाना शास्त्रेण प्रतिपादितत्वेऽपि तद्द्वारा प्राप्तस्य सर्वेभ्यो विभज्य दानमेव योग्यम् । तेनैव च ईश्वरस्य प्रसाद नान्यथा इत्येतत्परत्वमेवास्य वादस्येति न शास्त्रेण सह विरोधोऽपि ।

न्यायेनार्जनमर्थस्य रक्षण वर्धन तथा ।
सत्पात्रप्रतिपत्तिश्च राजवृत्त चतुर्विधम ॥

इति नीतिसारेणापि सत्पात्रप्रतिपत्तिर्विहिता उक्ताभिप्रायपरिपोषिका भारतीयराजनीतिर्भवति ।

स्पष्टीकृता चेयमुपाध्यायनिरपेक्षायाम ।

एव रीत्या सर्ववर्गाभिमत-प्रमाणत्रय-समन्वय-पूर्वक भारतीय-राजनीति सर्वेषा हितम् उपदिशति । यस्या प्राशस्त्य वेदेऽपि वर्णितम् —

"तस्य श्रद्धैव शिर., ऋत दक्षिण. पक्ष, सत्यम् उत्तर पक्ष., योग आत्मा, महः पुच्छ प्रतिष्ठा तदप्येष श्लोको भवति ।" इति (तै उप)

अत्र प्रमाणत्रय-सिद्धज्ञानस्य विज्ञानपद-वाच्यस्य गरुडरूपेण वर्णन कृतमस्ति । शास्त्राचार्योपदिष्ट-वाक्यञ्चिदमित्थमेवेत्यवधारणात्मिका श्रद्धा तस्य शिर, प्रत्यक्षानुमान-रूप सत्य, शब्दप्रमाणरूपमृत चेति तस्य पक्षद्वयम । एतत्त्रय-समन्वयपूर्वक चित्तवृत्ते स्थिरता-सपादनरूपो योग-स्तस्यात्मेति । अय भाव एतादृशसत्यर्तयो केनापि कारणेन सबन्ध-विच्छेदे सति विज्ञानस्य सत्त्वम् अमत्त्वेन तुल्य स्यात् । किं च नीतेरभावे लोके सर्वत्र कर्तव्यपरत्वाभावादशान्तिर्भवेदिति । अत एव **' सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे ।"** इति भारतीयराजनीतौ आचार्य-कामन्दकस्य कथन यथार्थमेव । **" सत्य त्वर्तेन परिषिञ्चामि "** इति मन्त्रस्यापीदमेव तात्पर्यम् ।

वेदादिना प्रशसिताया नीतेर्ज्ञानमस्माक यद्यपि भारतीय-राजनीति-शास्त्रादिवाधत पाश्चात्यनीतिशास्त्रादपि भवितुमर्हति तथापि वेदानु-यायिना भारतीयाना कृतेऽयमेव सिद्धान्तो यद्-अस्माभिर्भारतीयनीति-शास्त्रानुसारेणैव स्वदेशनीतेर्निर्धारण कर्तव्यमिति । यतो हि वय विशेषतो नियमविधिना बद्धा स्म, अतस्तादृश-नियमादृष्टसरक्षणमस्माक मुख्य-तम कार्यम् । नियमादृष्टविषये मीमासा-प्रसिद्धमुदाहरणम् इदमेव, यद वेदे तावद् दर्शपूर्णमासेष्टिप्रसङ्गे **" व्रीहीनवहन्ति "** इति विधि श्रूयते । तस्यार्थं पुरोडाशनिष्पत्त्यर्थं तुषविमोकमवहननेनैव कुर्यान्न तु नखविदल-नादिनेति । यतोऽत्र विधीयमानस्यावहननस्य तुषविमोकरूप दृष्टमेव फल नादृष्टम् । दृष्टे सभवति अदृष्ट-फल-कल्पनाया अन्याय्यत्वात । तुषविमोकस्यान्यथापि सभवे इतर-व्यावृत्ति-फलकावहनन-विधानान्यथानु-पपत्त्या नियमादृष्ट तु कल्पनीयम् । अस्यादृष्टमात्र प्रयोजन यदि स्यात्तर्हि सकृदवहननेनापि लक्ष्यसिद्धि स्यादिति । तदेव त्रिवर्गसमृद्धि-रूप दृष्टफलसिद्धयर्थम अस्माभिर्भारतीयनीतिशास्त्रानुसारेणैव व्यवहार कर्तव्य इत्यायाति । एतादृश-नियमपरिपालन दैनदिनव्यवहारेऽपि "दक्षिण-हस्तेनैव भोजन कार्यं वामत एव गमनम्" इत्यादिरूपेण दृश्यते । पूर्वोक्त-दृष्टान्ते यद्यवहननानन्तरम् अपि कस्यचिद् व्रीहेस्तुषविमोको न जात अवहननमप्यशक्य तदा यथा नखविदलनादीनाम् उपयोग कर्तुं शक्य, तथैव यदि भारतीयनीतिशास्त्रान्नीतिनिर्धारणस्य सर्वथा असभवस्तदा

RESEARCH INSTITUTE
84, R. H ROAD, MADRAS-

अन्यशास्त्रानुसारेण प्रवर्तनेऽपि नियमोल्लङ्घन-जन्य-दोषो न स्यात् । भारतीयराजनीतौ सर्वत्र प्रमाणत्रयसमन्वितमेवानुष्ठान विधीयते इति विशेष ।

तत्र येषां प्रश्नानां समाधान पाश्चात्त्य राजनीत्यनुसारेणाद्यापि न जात, तेषामेव विचारा क्रमेणात्र करिष्यन्ते। तेष्वन्यतम —"**परराष्ट्रेण सह जायमानस्य सन्धे स्थिरता कथ भवेद् इति प्रश्न** । तद्विषये भारतीय-राजनीते यद् वैशिष्ट्य तदधुना प्रतिपाद्यते ।

भारतीय-राजनीति-शास्त्र मुख्यतो भागद्वय वर्तते । तत्र क्रमेण स्वराष्ट्र-परराष्ट्रसबन्धिनो विचारा प्रवृत्ता । कामन्दकीय-नीतिसारे तावद् द्वितीय-सर्गत सप्तम सर्गान्त प्रथमो विषय, तत आरभ्य द्वितीय-विषयश्च प्रतिपादित । सोऽय सधिविचारस्तत्र द्वितीयभागे आयाति ।

* *

परराष्ट्रेण जायमानस्य संधेः स्थिरता ।

* *

परराष्ट्रेण सह प्रत्येकराज्यस्य कथ व्यवहारोऽपेक्षित इति भारतीय-पाश्चात्त्य-राजनीतिशास्त्रयोरुभयत्रापि महान विचारो वर्तते । तदर्थं सधि-विग्रह-यानासन-द्वैधीभाव-समाश्रय-रूप षाड्गुण्य निर्दिष्टम् । तत्र सधिरेव प्रधानतम । तदर्थमेव च अन्येषा गुणानामावश्यकता । सन्धिम् उपेक्ष्य विग्रहद्वारा प्रजा-पशु धन-कोशादीना क्षयस्तु न कस्यापि विचारशीलस्य राष्ट्रस्य सम्मतो भवितुमर्हति। एव तर्हि सर्वेषाम् अभीष्ट-तमा शान्तिरपि सन्धि-पदार्थ एव । अत एवाचार्यचाणक्येन "**शम समाधि सन्धिरितिपर्याय**" इत्यर्थशास्त्रे शम-पर्यायत्व सन्धे प्रतिपादि-तम् । तत्तच्छास्त्रीय-पारिभाषिकशब्दानामर्थनिर्णयस्तु तत्तद्-व्याख्यानु-सारेणैव कर्तुमुचित । "**राज्ञा विश्वासोपगम सन्धि । अय सदिष्ट साध-यिष्यत्येवेत्याकारक-निश्चयो विश्वास ।**" — इति हि तद्व्याख्याकृद्भि-र्वर्णितम् । एतादृशो विश्वासो यदि स्थिरतया यावज्जीवमग्रेऽपि वश-परम्परया च स्थास्यति, तदा स्थिरसन्धिरित्युच्यते । एतदर्थमेव नीतौ शब्दप्रमाणस्यापि समन्वय इष्ट । तात्कालिको विश्वासस्तु कारण-विशेषाद् विनष्ट सन् परस्पर-युद्धादिपरिस्थितिमवश्यमातनोति । यया

च जनताया सुख स्वप्नायमान स्यात् । अस्योदाहरणम् इदानी प्रत्यक्षतः सर्वत्र दृश्यते । स्थिरविश्वासस्याभावादेव हि राष्ट्र सामाजिक-सुख-शान्त्यादिभिर्वञ्चितमस्ति ।

राष्ट्रयोर्द्वयोर्यत्र पूर्वोक्तविश्वास स्थिरो भवति, तयो परस्पर मित्रत्वेन व्यवहार साहजिक परिणामस्तस्य । दास्यभाव एव एतादृश-मित्रताया प्राणा इति, ईश्वरभक्तिपरम्पराया अवगाहनेन सिध्यति । तथा हि —

"श्रवण कीर्तन विष्णो स्मरण पादसेवनम् ।
अर्चन वन्दन दास्य सख्यमात्मनिवेदनम् ॥"

— इति श्रीमद्-भागवते नव-विधा भक्तिर्वर्णिता । तत्र उत्तरोत्तरभक्ते पूर्वपूर्वभक्ति कारणम् । अतो दास्यमेव सख्यस्य कारणम् इति सर्वेषा भगवद्भक्तानाा सिद्धान्त । सख्यभक्तेश्च परस्पर विश्वास एव स्थायि-भाव । दास्य नाम स्वामिशेषत्वम् । अय भाव — यस्य हृदये स्वविषये तादृश-विश्वास समुत्पादनीयस्त प्रति सेवा-दृष्ट्या-मनो-वाक्-काय-कर्मभि प्राणानामपि समर्पणमिति । अङ्गाङ्गिभाव एव स्वामि-सेवकयो-रन्योन्य सबन्धो भवति, अत उक्त दास्यभाव-युक्तस्य सेवकस्य योगक्षेम-चिन्ता अपि स्वामिन कर्तव्यकोटावायाति । अत एव भगवता श्रीकृष्णेन —

"अनन्याश्चिन्तयन्तो मा ये जना पर्युपासते ।
तेषां नित्याभियुक्तानाा योगक्षेम वहाम्यहम् ॥"

इत्युक्त गीतायाम् ।

अत्र "अनन्या" इति पद पूर्वोक्तदास्यवाचकम् । द्रौपदीवस्त्रहरणप्रसङ्ग अत्रोदाहरणम् । द्रौपद्या हृदये स्वपतिषु समासत्सु च "एते मा सरक्षेयु" इति विश्वासो यावदासीत्तावद् भगवता श्रीकृष्णेन तत्सरक्षणे न कोऽपि प्रयत्न कृत । यदा सापत्यादीना स्वसरक्षणे असामर्थ्य ज्ञात्वा, अनन्य-भावेन श्रीकृष्णमेव शरण गता, तदैव भगवान् वस्त्ररूपेणागत्य तस्या मर्यादा-सरक्षण कृतवानिति ।

एव रीत्या परमेश्वर एव मम हित साधयतीति बुद्धया यथा यथा तत्र विश्वास स्थिरो भवेत्तथा तथा सख्य-भक्तेरपि स्थिरतया क्रमेणे-श्वरसारूप्य प्राप्य भक्तो मुक्तो भवति ।

अयमेव क्रम पूर्वोक्त-सन्धिविषये ज्ञेय । अर्थाद् ययो परस्पर सख्यमभीष्ट तयोरेकेनापरस्य परस्पर वा सेवा अवश्य विधेया भवेत् । सेवाद्वारा परमात्मन सख्यप्राप्तिस्त्वतीव सुलभा । किन्तु ययो राज्ञो सन्धि कर्तव्यस्तयोरेक स्वार्थित्वेन अनधिकारी चेत्तत्र जायमान सधि स्थिरतया स्थास्यतीति न विश्वास कर्तुं शक्य । अत एवेदानी यावत् पाश्चात्यसमाज अस्य प्रश्नस्य समाधानम् अशक्यप्राय जातम् । भारतीय-नीतिज्ञै तु अस्या समस्याया सम्यगुत्तर कृतम् इति तद्ग्रन्थतोऽवगम्यते । तथाहि सधिस्तावद्द्विविध , चलसन्धि स्थिरसन्धिश्चेति । तत्र येन सन्धिना जात सख्यम् अल्पकालावधिकमेव भवति, स चलसन्धि । एतस्योदाहरण तु द्वितीयमहायुद्धपूर्वं रूस्-जर्मन्देशयोर्जाति सधि साम्प्रत सर्वदा जाय-मानो भारत-पाकिस्तानयो सूक्ष्म कलहोऽपि चलसधे परिणाम एव ।

* *

पूर्वे राजानः सत्येन संदधिरे ।

* *

एव मिस्र-देशेन "सुवेज्"-जलमार्गस्य (कॅनॉल) राष्ट्रीकरणद्वारा य आङ्गलदेशेन सह पूर्वकृतस्य सधेरुच्छेद कृत सोऽपि चलसधेरेव परि-णाम, एतद्विपरीतस्य स्थिरसधेरुदाहरण च श्रीरामचन्द्र-सुग्रीवयो सधि । अग्निसाक्षिक कृतस्य तस्य पालनम् उभाभ्या यावज्जीव कृतमा-सीत् ।

एतादृश-स्थिरसधेरधिकारिण के वा भवितुमर्हन्तीत्यस्मिन् विषये आचार्यचाणक्येनार्थशास्त्रे एव प्रतिपादितमस्ति ।

"सत्य शपथो वा चलसधि प्रतिभू प्रतिग्रहो वा स्थावरसधि इत्याचार्या', नेति कौटिल्य', सत्य शपथो वा परत्र इह च स्थावरसधि , इहैव प्रतिभू' प्रतिग्रहो वा बलापेक्ष सहिताः स्म इति पूर्वे राजान; सत्येन सदधिरे" इति । (कौ अ ७-१७)

अस्यार्थ. — केषाचन अर्थशास्त्राचार्याणाम् इद मत, यद् ययो राष्ट्रयो सधिरभीष्टस्तयो अन्योन्यम् अत्यन्तोपयोगिवस्तुनो राष्ट्र-प्रधान-पुरुषस्य वा एकेन अपरस्य स्वायत्तीकरण प्रतिग्रह-पद-वाच्य, सयुक्तराष्ट्रसघ-सदृशस्य अपराधिने दण्डदान-समर्थस्य मध्यस्थस्य समक्ष

क्रियमाण सन्धिश्च तत्स्थिरताया प्रयोजकम । अन्यथा केवल सत्यशपथाभ्या सपन्न सधि न स्थिरो भवितुमर्हतीति, प्रायोऽयमेव विचार पाश्चात्यनीतिज्ञानाम् अपि । पर चाणक्येन तन्मतमपि सगृह्य स्थिरसख्यं सत्य-शपथयो अपि आवश्यकता प्रतिपादिता । इदमेव पूर्वोक्तप्रश्नस्य उत्तर भारतीय-दृष्टया । एतावता आचार्य-चाणक्यस्य अभिप्राय न स्पष्टो भवति इत्ययमेव विषयो विस्तरेण प्रस्तूयते ।

अपरेण सह मध्यस्थं राजा राष्ट्र वा कस्मिन्नप्यंशे स्वस्मिन्न्यूनताम् अवगम्यैव प्रवृत्त भवति । प्रभुमन्त्रोत्साह-शक्तीना बल पूर्णतया स्वस्मिन् यदि स्यात्तर्हि सधिप्रार्थनापूर्वक शत्रुसमय-समर्पि को वा कुर्यात् ? अत. परिस्थितिवशात्समुत्पन्नया स्वशक्तिन्यूनतया आगताया विपत्ति परिहारार्थं शनै. शनैर्बलसवर्धन च सधर्मुख्य प्रयोजनम् । तदुक्त कामन्दकेन —

"बलिना विगृहीत सन्नुपोऽनन्यप्रतिक्रिय ।
आपन्न सधिमन्विच्छेत् कुर्वाण कालयापनम् ॥"

इति । अत स्वशक्तिपूर्तेरनन्तरम् अवश्यमस्य सर्वविध व्यवहारेषु क्रमेण विनय-परित्याग-पूर्वक परिवर्तन भविष्यत्येव । यतो वीरस्य स्वभाव एवैष । अत प्रतापी राजा स्वीकृतस्य समयस्य यथावत परिपालनम् अवश्य करिष्यत्येवेति विश्वासो न कर्तुं शक्य, प्रत्युत तत्प्रतीकारदृष्ट्या

धर्मेण हीनाः पशुभिः समानाः

तेन पूर्वम् अर्पितस्य वस्तुन प्रत्यर्पण, नूतन-समयश्च समुपस्थाप्येत । तदानी तस्य बल ज्ञात्वा अर्पित-वस्तु-दानमनिच्छयाप्यन्यस्य कर्तव्यतया आपतति, अन्यथा युद्ध-प्रसङ्ग स्यादिति । एतादृश्यामवस्थाया मध्यस्थस्यापि तूष्णीभावोऽवश्यभावी । अत केवल प्रतिभू-प्रतिग्रह-द्वारा जायमानस्य सधेरस्थिरता निश्चिता एव । नाय नियमोऽप्राकृतिक पश्वादिष्वपि तथा दर्शनात् । अत एव "धर्मेण हीना. पशुभि समाना" इत्युक्तम् ।

किंच सन्धिकारिषु केचनोच्चप्रकृतिका केचन निम्नश्रेणिपतिता अपि भवन्ति । तत्रोच्चप्रकृतिकैः सह पाश्चात्याभिमत-पूर्वोक्त-प्रतिभू-प्रतिग्रह-द्वारा कृत सधि परिणामे युद्धप्रसङ्गम् अवश्य समुपस्थाप-यिष्यति । अत केवल-प्रतिभूप्रतिग्रहो न स्थिरसधे प्रयोजको । किंतु उच्च-प्रकृतीना नियन्त्रणार्थम् एव तत्र सत्यशपथयोरप्यावश्यकता अस्तीति चाणक्यस्याभिप्राय । अत स्वराष्ट्रे परराष्ट्रे वा सत्य-शपथयो उपेक्षा-पूर्वक क्रियमाणोऽपि सधिर्न कथमपि शान्ति जनयिष्यति ।

सत्य-शपथयोः अनिवार्यता

उच्चप्रकृतिकेषु स्थिरसध्यर्थम् अपेक्षितयो सत्यशपथयो अर्थम्तु अर्थशास्त्रे एव वर्णित । "सत्य नाम प्रमाण-प्रसूत परलोक-विश्वास । शपथ च ज्ञानपूर्वक जनताया समक्ष लेखद्वारा वचनद्वारा वा सधौ निर्दिष्टाना समयाना स्वीकार " इति । एतयोर्द्वयोरुपेक्षा तु सख्यस्य स्वराष्ट्रस्य स्वस्य च विनाशे हेतुर्भविष्यतीत्यवश्य ज्ञातव्यम् ।

अत्र परलोक-विश्वासम् अन्तरा अवशिष्टत्रयेणापि सधे स्थिरा स्वराष्ट्रे परराष्ट्रे वा परस्पर मित्रतया व्यवहारश्च भवितुमर्हति तद्रहित-स्यापि शासकपदे स्थापन न शक्यम्, यतो हि शपथातिक्रमे लोकलज्जा-जनकतया उच्च-प्रकृतिकाना शपथ-विरुद्धाचरणे प्रवृत्तिरेव न स्यात् । अतो राज्यव्यवहारे तस्य न आवश्यकता इति केषाचिदाक्षेप स्यात् । सोऽयम् आक्षेप तदा एव सगत स्याद् यदि सधिकर्तुं स्वय स्वीकृताया प्रतिज्ञाया विरुद्धाचरणे तदुपेक्षाकरणे वा लज्जाया अनुभव स्यात् । पर तस्यैव असभव परलोकभयम अन्तरा । एतावास्तु शपथस्य उपयोगोऽ-वश्य भवति, यत् उच्च-प्रकृतिकाना तादृशाचरणस्य जनताया प्राकट्ये सति तेषां मुखे रक्तिम-स्थाने श्यामता आयाति । तावता परलोक-विश्वास-रहितेषु प्रतिज्ञाविरुद्धाचरण प्रतिज्ञातोपेक्षा वा न भविष्यत्येवेति वक्तु न शक्यम् । उक्त-सभावनामात्रेण अधुनापि शासक-पदारोहण-समये शपथ-ग्रहणस्य पद्धति स्थापिता वर्तते । सूक्ष्मदृष्टया विचार्यमाणे पूर्वोक्तपक्षे महती न्यूनता दृश्यते । यतो हि शासकपदे स्थिते जनताया

स्वविषये विपरीत-भावना मा भूत इति विशेषतोऽवहितैर्भूयते । तत्र जनमतस्यैव यथा यथा परिवर्तन भवेत्तथा तथा तद्व्यवहारस्यापि क्रमेण परिवर्तनेन अवश्य भाव्यम् । तेन च पूर्व-सिद्धान्तस्यैव वैपरीत्ये सति तदनुसारेण कृताया प्रतिज्ञाया विरुद्धाचरणम् अपि लज्जावह न भविष्यति । एतद्विषये उदाहरण तु इदमेव, यद् एकस्मिन समये भारतीय-सम्यताया चिह्नत्वेन शिखाया माहात्म्यम् अत्र आसीत । अत एव तद्-रक्षणार्थं छत्रपति श्रीशिवाजी-गोविन्दसिंह-प्रभृतिभि समराङ्गणे अवतीर्य स्व प्राणदानमपि कृतम । तदानी शिखाया अस्थापन नाम भारतीयाना कृते अतीव अपमानकारकम् आसीत् । परम इदानी तस्मिन्नेव भारतवर्षे लोकै स्वेच्छया तत्कृन्तन क्रियत, प्रत्युत तद्रक्षणम् अपि अतीव लज्जावह सवृत्तमिति ।

अत्र शपथस्य स्थिरता लोकमत-स्थिरतायीना, सा च मूलसिद्धान्तस्य स्थिरताम अपेक्षते । अन्यथा लोकमतस्य अस्थैर्ये शासकाना स्थिरकर्तव्यपरतायां अभावे अधुना प्रतिज्ञाय अपि अग्रे ते अस्माक हित साधयिष्यन्त्येव इति विश्वास कदापि न कर्तुं शक्य । अत सन्धे स्थिरतासपादकेषु चतुर्थं परलोकविश्वास अपि दीर्घदर्शितया अनर्थपरिहाराय चाणक्येन परिगणित । अत एव प्राचीनेतिहासेषु "सत्यसधा हि राजान ।" इति राज्ञा वर्णन तत्र तत्र उपलभ्यमान सगच्छते ।

सौभाग्यवशात स्थिरसधेश्चतुर्षु साधनेषु अय परलोक-विश्वास प्रकृत्या निधिरूपेण अस्मासु भारतीयेषु अनादिपरम्परया प्राप्त अद्यापि केषुचिद् भारतीयेषु दृढतया दृश्यते । तस्य कारण तु अपरिवर्तनीय-वैदिक-सिद्धान्तानुसारित्वम् एव । एतादृश-महत्त्वपूर्ण-वैदिकमतानुयायिनः अन्धविश्वासिन इति कथन तु स्वीय-अज्ञताया परिचायकमेव । यतो वैदिक-सिद्धान्तस्य असत्यता विज्ञानतोऽपि न सिध्यति । तत्स्थिरता-हेतुभूत-वेद-अपौरुषेयत्व-विषयवास्तर्कास्तु ग्रन्थविस्तरभयादत्र नोच्यन्ते । ते च अत्रैव ग्रन्थे परिशिष्टे द्रष्टव्या ।

भारतीय-नीतिशास्त्रज्ञै तर्कत निश्चितस्य भारतीयेतिहासेषु प्रसिद्धस्य च स्थिरसधे सम्यग्ज्ञान पाश्चात्याना नास्ति इत्यस्य हेतुस्तेषा सिद्धान्ताना सदैव परिवर्तनीयता । अत एव परिस्थितिवशाद्-विवशतया

1895

अद्यापि पाश्चात्यै "भारतम् एव इदानीं स्थिरशान्तेर्मार्गदर्शकं भवेत्" इत्युच्यते । एतादृश-स्थिरसंघ एव सुवर्णसंधि संगतसंधिश्च इत्यादर नाम । तदुक्तं कामन्दकेन—

"सद्भि संगतसंधिस्तु मंत्रीपूर्व उदाहृत ।
यावदायु प्रमाणं तु समानार्थप्रयोजन ॥"

—इति । (कामन्दकीयनीतिसारे ९ स)

यथा सुवर्णशकलद्वयस्य द्रवतायाम् ऐक्यं भवति तथैव स्थिरसंधिना संबद्धयो पक्षयो एकमत्यं, तेन च आजीवनं समभावेन अन्योन्यं सुखदुःखे अनुभूयेते । एवं स्वराष्ट्राभ्यन्तरे अपि राज्ययन्त्र-संचालने अपेक्षितानां सर्वेषां अङ्गानाम् एकप्राणता यावन्न भवति, तावत् सुव्यवस्थाया राज्य-चक्र-प्रवर्तनं दुःशकम् । अत एव उक्तं कामन्दकेन—

भारतम् एव स्थिरशान्ति-मार्गदर्शकम्

"परापरोपकारीदं सप्ताङ्गं राज्यमुच्यते ।
एकाङ्गेनापि विकलम् एतत् साधु न वर्तते ॥" इति ।

भारतवर्षे आरम्भत एव एतादृश सामरस्य गुरु-शिष्ययो पति-पत्न्यो, राजप्रजयो स्वामिसेवकयोश्च यथा स्यात् तथा विशेषेन प्रयत्न प्रचलित, तत्साफल्य च व्यवहारे प्राप्तम आसीद् अतो देशे सर्वत्र शान्ते साम्राज्यमप्यासीद् इति इतिहासतो ज्ञायते, एतादृशपरिस्थितेश्चित्रणं भवभूतिना कृतमस्ति । तद् यथा—

"अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यत् ।
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत् स्नेहसारे स्थितम् ।
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥" इति ।

उपर्युक्तविवेचनेन एतावत्तु स्पष्टं भवति यत् यथा कस्यचिद् ब्राह्मणस्य स्वरूपसौन्दर्यं ब्रह्मचर्याद्याश्रम-विहितानां कर्तव्यानां यथावत्परिपालनेनैव, न तु जन्ममात्रेण, एव शब्दप्रमाणमात्रनिर्णेयस्य अपि धर्मस्य प्रत्यक्षानु-

मानाभ्यां हित-साधनता निश्चित्य चित्तसतोषपूर्वक नीतिरूपेण अनुष्ठाने एव सर्वेषा रञ्जकत्वम् इति। एतादृश-प्रमाणत्रय-समन्वित-नीतिपथम् आरूढे स्वराष्ट्रे परराष्ट्रे वा स्थितं सह स्थिर-सधि कर्तुं शक्यं । परमित्थं महत्त्वपूर्णाया भारतीय-प्रणाल्या दूरापेतो वर्गस्तु न कदापि स्थिरसधे पात्र भवितुम् अर्हति । यदि तादृशवर्गेण सह सधि क्रियेत तर्हि स्वार्थ-परवश स किं न कुर्यात्? एतद्विषये लोकोक्तिरपीय प्रसिद्धा ।

"मृदघटवत्सुखभेद्यो दुःसधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्य. सुकरसधिश्च ॥" इति ।

एवरीत्या पाश्चात्य-नीति-स्थिताया एकस्या न्यूनताया परिहारो भारतीय-नीतिशास्त्र-दृष्ट्या कथ भवितुमर्हतीति सक्षेपत प्रतिपादितम् ।

इत परम् अन्येषा पाश्चात्यनीतौ समुद्भाव्याना प्रश्नाना तद्गत-न्यूनताना च विचार, स्थिरसन्धि विषयेऽवशिष्टो विचारश्च क्रमेण करिष्यते ।

तत पूर्वं "राजानम् उद्दिश्य विहिताया नीतेरुपदेश अन्येषा कृते क्रियमाण सन्यासिन प्रति गृहस्थधर्मोपदेश इव व्यर्थो भवेत् । अत एव कामन्दकेनापि आदावेव एवमेव प्रतिपादित नीतिसारे —

"उपार्जने पालने च भूमेर्भूमीश्वर प्रति ।
यत्किञ्चिदुपदेक्ष्यामो राजविद्याविदां मतम् ॥"

इति, 'भूमीश्वर प्रति अन्यस्य तु राजविद्यायाम् अनधिकारात्' इति तद्व्याख्याया जयमङ्गलायाम अपि उक्तमिति स नीतेरुपदेश इतरेषा कृते कथ युक्तो भवेत्?

किं च तादृशो राजनीतिरूपो व्यवहार सामान्यजनं क्रियमाण कथ शास्त्र-सगत स्यात्? इति प्रश्नयो प्रासङ्गिकयो समाधान मीमासा-धर्मशास्त्रयो. समन्वयेन क्रियते ।

राज्ञा यावत् सम्यक्प्रजापरिपालन क्रियते, तावत् सामान्यजनाना राजनीतौ उपेक्षा न राज्यव्यवहारेषु बाधिका भवति, किं तु यदा राजा शासनकार्ये अयोग्य प्रजासु अराजकता-दशा वा स्यात् तदानीम् अन्यैरपि

क्रियमाणा राजनीतेरुपेक्षा तु राष्ट्रेण सह सर्वेषा विनाशजनिका, शास्त्राज्ञा-विपरीततया प्रत्यवायजनिका च स्यात्। तदुक्त महाभारते, "क्षात्रो धर्मो ह्यादिदेवात् प्रवृत्त पश्चादन्ये शेषभूताश्च धर्मा." इति। एतद्-वचनस्यापाततो यद्यपि विधिरूपता न प्रतीयते तथापि तात्पर्यं तत्रैवेति निर्णेतु शक्यम्। तथा हि, सृष्टि-कर्तृ-ब्रह्मण पूर्वं क्षात्रधर्म प्रवृत्त', तत-

ईश्वर-प्रयत्नारम्भः जगत्परिपालनम् उद्दिश्यैव

स्तदङ्गतया अन्ये धर्मा इति तदर्थं। सारांशस्तु ईश्वरप्रयत्नस्य आरम्भ सृज्यमानजगत्परिपालनम् उद्दिश्यैव जात, तत्तत्सहकारितया अन्येषां धर्माणाम् उत्पत्तिरिति।

वस्तुतोऽङ्गस्य सार्थक्य तदैव, यदा प्रधान-लक्ष्यसिद्धि पूर्णतया तेन स्यात। मीमासकसमताङ्गत्वविचारेणायमश स्पष्टो भवति। "परोद्देश्य-प्रवृत्त कृति-कारकत्वेन विहित यत्तत्त्व तदङ्गत्वम्" इति ते वदन्ति। अत क्षात्रधर्मो यदि मुख्यवस्थित स्यात् तर्ह्येव वर्णाश्रम-धर्मानुष्ठान-स्यापि साफल्यम् अन्यथा तु तदनुष्ठान व्यर्थमिन्यायाति। एतादृशाङ्गा-ङ्गिभावविचार पूर्वाचार्यैरपि कृतोऽस्ति। "तमेत वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन।" एवम् —

"तावत्कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथा श्रवणादौ वा श्रद्धा यावन्न जायते॥"

इति श्रुतिपुराणादिवचनेषु ब्रह्मजिज्ञासाया भगवत्कथाश्रवणादौ श्रद्धाया वा समुत्पन्नायाम् एव वेदाध्ययनादि-धर्मानुष्ठान-साफल्यम् अन्यथा तु न इत्येव प्रतिपादनात्।

उक्त-महाभारत-वचने प्रयुक्तेनाङ्गत्व-बोधकेन "शेषभूता" इति पदेन तस्य विधिरूपता उच्यते। अत क्षात्रधर्मस्योपेक्षा अन्येषामपि न केवलमनुचिता, किंतु ईश्वराज्ञोल्लङ्घन-मूलक प्रत्यवाय-जनिकापीति सिध्यति।

अत्र विषये क्षात्र-धर्म-पदस्य योग्या व्याख्याम् अजानद्भिरेवम् आक्षेप क्रियते यत् " **वर्णाश्रम-धर्माणाम् अनेकेषु विविदिषाविलक्ष्येषु क्षात्र-धर्म-पोषणम् अपि एक लक्ष्य वर्तते** । किं च क्षत्रियाणामेव तत्र विशेषत अवधानम् आवश्यक तेषा धर्मत्वान्नान्येषाम् । अतोऽन्यलक्ष्योद्देशनापि वर्णाश्रम-धर्मनिष्ठानस्य चारितार्थ्यं सभवति क्षात्र-धर्मोपेक्षा नान्येषा दोषावहा स्यादिति ।

यथावत् जगत्परिपालनम् एव क्षात्रधर्मः

परमत्र क्षात्र-धर्म-पदस्य " **जगतो यथावत् परिपालनम्** " इति व्यापकोऽर्थो विवक्षितो न सकुचित । विचार-शीलाना मनसि न कदापि ' **जगत परिपालनम् अस्तु वा मा वा तेन का क्षतिरस्माकम्** " इति भावना भवितुमर्हति । प्रत्युत " **न वय जगतो बाह्या , अतस्तत्पालनम् एव अस्माक पालनम्** " इति ते वदिष्यन्ति । राष्ट्रस्य रक्षणेनैव हि तदन्तर्गतव्यक्तीना धनादीना च रक्षण सिद्ध भवति । अतो यदि रक्षणकर्मणि नियुक्त क्षत्रिय असमर्थस्तत्र भवेत्तदा आत्मरक्षणदृष्ट्या अपि प्राणिमात्र-सरक्षणोपेक्षा नोचिता । किंच यथा सर्वेषा स्व-स्व-विशेष-धर्मानुष्ठान कर्तव्यम्, तथा सामान्य-धर्मानुष्ठानमपि ।

अत कामन्दकेनापि उक्तम —

" **अहिंसा सूनृता वाणी सत्य शौच दया क्षमा ।**
वर्णिना लिङ्गिनां चैव सामान्यो धर्म उच्यते ॥ " इति ।

एतेषाम् उद्देश्य तु भूतपरिपालनमन्तरा किमन्यद् वक्तु शक्यम् ? अत्र विषये नाधुनिकानामपि वैमत्य भवितुमर्हति ।

धर्मशास्त्रनिबन्धानुसारेण अपि एतद्विचारस्य समर्थन भवति । तथाहि–याज्ञवल्क्येन व्यवहाराध्यायारम्भे उक्तम् —

' **व्यवहारानृपः पश्येद् विद्वद्भिर्ब्राह्मणैः सह ।**
धर्मशास्त्रानुसारेण क्रोध-लोभ-विवर्जितः ॥ " इति ।

व्यवहारादि-राज-निर्णयः विद्वत्-संमत्या एव ।

एव तत्रैवान्यत्र—

" श्रुताध्ययनसपन्ना धर्मज्ञा सत्यवादिन. ।
राज्ञा सभासद. कार्या रिपौ मित्रे च ये समा ॥ "

इत्यपि उक्तम् । उभयत्रापि व्यवहारादि-निर्णयो विद्वत्-समति-पूर्वक राज्ञा कर्तव्य इति निर्दिष्टम् ।

अत्र पौनरुक्त्यपरिहारार्थं पूर्वश्लोके " ब्राह्मणं " इत्यस्य व्याख्या " अनियुक्तं· " इति कृता मिताक्षराकारेण । वेतन गृहीत्वा ये राजसभा प्रविशन्ति ते सभासद, ये तु निर्वेतनिका स्वतन्त्रा विद्वासस्तेऽनियुक्त-पदवाच्या भवन्ति । इत्थ च विरक्तानां स्वतन्त्राणां विदुषां न्यायालयादिषु गमनस्यैव कथं सभव ? इति प्रश्नो वीरमित्रोदयादि-ग्रन्थेषु समाहित । तत्र हि —यदि शासनारूढस्य राज्ञो न्याय-दाने अनौचित्यम् आवश्यक-प्रमाणाद्यज्ञान वा स्यात् तदा तत्र स्वयमुपस्थाय न्याय-सगत-प्रमाणादि-प्रदर्शनम् अनियुक्त विदुषा कर्तव्यम् । तेन च न्यायलाभाद् वञ्चितो वर्ग उपकृतो भवेदत तेषा राज्ञश्च ऐहिक-पारलौकिकोभयविध-श्रेयश्च सिद्ध भवेत् । अन्यथा "**ज्ञात्वाप्येभिर्जगत्पालने उपेक्षा कृतेति ईश्वरकोपभाज-नान्येते स्यु ।**" इति प्रतिपादितम् ।

एवमेव महर्षिणा गौतमेनाप्युक्त धर्म-सूत्रे । तत्र हि, ब्राह्मणादिभिर् द्विजातिभि स्वशुद्धयर्थं जन्मप्रभृति आमरण गर्भाधानाद्यष्टाचत्वारिंशत्-सस्कारा विधेया । तद्द्वारा च धर्मार्थ-काम-सिद्धि-पूर्वकम् अन्ते ईश्वर-प्राप्तिरूपो मोक्षोऽपि तेषा सिद्धो भवतीति प्रतिपादितम् । तेषु चत्वारिं-शत्-सस्कारा वैदिका. । अवशिष्टास्तु —

" दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो माङ्गल्यम् अकार्पण्यम् अस्पृहा ।" (गौ ध सू ८–२१) इति सामान्य-धर्म-रूपा अष्टावात्मगुणा एव ।

इदमपि तत्रैव प्रतिपादितम् । यत् – " **यस्यैते न चत्वारिंशत्-सस्कारा न च अष्टौ आत्मगुणा न स ब्रह्मण सायुज्य सालोक्य च गच्छति**

THE KUPPUSWAMY SA

यस्य तु खलु सस्काराणाम एकदेशेऽपि अष्टौ आत्मगुणा अथ स ब्रह्मण सायुज्य सालोक्य च गच्छति ।" इति । उक्त-सामान्यधर्माणा यथावद् अनुष्ठाने सत्येव अन्यैर्वैदिकसस्कारै जनिताया शुद्धे साफल्य भवेन्नान्यथा इति भाव ।

* *

क्षात्रधर्म-रक्षण सर्वैषां कर्तव्यम् ।

* *

एव च जगद्रक्षणमेव सर्वेषा धर्माणा मुख्य लक्ष्यम् इति स्मृतिकाराणामपि समतम् इत्यायाति । अत उपर्युक्त-क्षात्रधर्म-पदस्य एतादृश-व्यापकार्थकत्व ज्ञायते । नीतिशास्त्रानुसारेण समन्वयपद्धत्या इदमपि वक्तु शक्य, यद् वर्णाश्रमधर्मानुष्ठानस्य फलत्वेन उपवर्णिता विविदिषा ईश्वर-भक्तिर्वा वस्तुत क्षात्रधर्मान्न पृथग्वर्तते इति । यतो हि, ज्ञानी ईश्वर-भक्तश्च अत्यन्त शान्त-स्वभावौ भवत इति सहजत एव तयो राग-द्वेष-राहित्य-पूर्वक दयाऽहिंसादि-सामान्यधर्मानुष्ठान घटते । अत एव भक्ता ज्ञानिनश्च ईश्वरकृपापात्राणि भवन्ति । श्रीमद्भागवतेऽपि उक्तम् —

" यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरि. ।
तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ॥ इति ।

अत्रादिपदग्राह्या गुणास्तु विष्णुधर्मोत्तरपुराणस्थेन —

" सुशीलो भव धर्मात्मा मैत्र प्राणिहिते रत ।
निम्न यथाऽऽपः प्रवणा पात्रमायान्ति सपद ॥ "

— इति श्लोकेन अवगम्यन्ते । अत सामान्यधर्मानुष्ठानमन्तरा न ज्ञानी भक्तो वा कोऽपि भवितुमर्हति । भाव-प्रकाशनेऽपि

" यथाशक्ति परित्राण दु खितानां विशेषत. ।
विना रागेण सर्वत्र सुखिनामनुमोदनम् ॥ "

इत्यादय शान्तस्य स्वाभाविका गुणा उक्ता ।

एतावता विवेचनेन इद स्पष्ट भवति, यद्वर्णाश्रमधर्मा जगत्परि-पालनरूपक्षात्रधर्मस्य अङ्गभूता इत्यत क्षात्रधर्मरक्षणम् अपि अस्माक सर्वेषा कर्तव्यमिति ।

एव प्रासङ्गिकाक्षेपसमाधानानन्तर स्थिरसधेरवशिष्टाशो निरूप्यते।

इतिहासतो ज्ञायते यद् भारतीयनीतिशास्त्रे वर्णितस्य स्थिरसधेर् लाभाद् भारतीयजनता न केवल सपूर्णस्य जगत किन्तु परमेश्वरस्यापि विश्वासपात्रम् आसीत्। अत एव स्वय भगवानपि अत्रैव अवतीर्य स्वलीला कृतवान् इति ।

देशसेविनो भारतीय-समाजस्य अन्तर्गतैर्विश्व-कल्याण-परायणैर् ब्राह्मणैरेव प्रथम स्थिरसधे शक्यसपादनता लोकेभ्य प्रदर्शिता। ततो ब्राह्मणसकाशादेव च सेवाद्वारा सर्वेण जगता स्थिरसधे शिक्षा प्राप्ता। अत सर्वेषा जीवन-क्रम शान्तिपूर्ण आसीत्। इदमेव तथ्य लक्ष्यीकृत्य क्षत्रियेणापि मनुना उक्तम् —

"एतद्देशप्रसूतस्य सकाशादग्रजन्मन ।
स्व स्व चरित्र शिक्षेरन् पृथिव्या सर्वमानवा ॥" इति।

स्थिरसधिद्वारा सर्वत्र व्यवस्थाया क्रियमाणायामेव राष्ट्रान्तर्गत-सर्वप्राणिनाम एकात्मभावेन सतोषपूर्विका स्थिति शक्यसपादना, नान्यथा। अतस्तदर्थं जनताया परलोके दृढनिष्ठाया आवश्यकता अस्ति इत्युक्तमेव।

तान् अन्तरेण निपतेत् क नु मत्प्रणामः ।

एतादृशस्थिरसिद्धान्तस्य ज्ञान यस्मात् प्रमाणमूर्धन्याद अपौरुषेयाद् वेदाद् भवति, तस्य सरक्षण दुश्चरतपस्यापूर्वक देशसेवादृष्टया सामान्य-जनताया कृते विधाय ब्राह्मण-वर्गेण स्वीय कर्तव्य-परम् आदर्श-जीवन जगत पुरस्तात् स्थापितम्। अत एव भोजराजेनोक्तम् —

"उच्चैर्गतिर्जगति सिध्यति धर्मतश्चेत् ।
तस्य प्रमा च वचनं कृतकेतरैश्चेत् ।
तेषा प्रकाशन-वशा च महीसुरैश्चेत् ।
तानन्तरेण निपतेत् क्व नु मत्प्रणाम. ? ।" इति ।

एवरीत्या उत्तरोत्तर गौरव-भाजनान्यपि, येऽद्यापि पूर्णतया विश्वास. कर्तुं शक्यस्तादृशा ब्राह्मणादयो वर्णा इदानी सर्वत्र उपेक्षाभाज-

नानि सवृत्तानि इत्यस्य कारण तु स्थिरसधेर्मूलभूताना प्रोक्ताना चतुर्णां साधनाना विस्मरणम् एव एतेषाम् । अत एव वर्तमानसमये पूर्वपरपरया स्वीकृतेषु तदुपायेषु एतेषाम् अवधान यथा स्यात तथा प्रयत्न आवश्यक इति प्रतिभाति ।

प्रोक्तेषु चतुर्षु स्थिरसधेरुपायेषु प्रतिभूपदवाच्यम् उत्तरदायित्व जन्मत एव एतेषु वर्गेषु स्थापित वर्तते । यानि खलु कार्याणि विशेषत परम्परया कर्तव्यत्वेन प्राप्तानि, तेषा ज्ञानस्य अविच्छेद प्रथमत आवश्यक इति तत्र प्रयत्यते ।

वेद-तात्पर्य-प्रकाशकेषु स्मृति-ग्रन्थेषु इदमुलभ्यते, यत्

" प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वा परिददे प्रजा ॥
न च वैश्यस्य काम. स्यान्न रक्षेय पशूनिति ।
वैश्ये चेच्छति नान्येन रक्षितव्या कथचन ॥ " इति मनु ।

अयमर्थ — प्रजासरक्षणभार सृष्टिकालात्प्रभृत्येव क्षत्रियेषु च स्थापित, पशुसरक्षण च वैश्येषु । अतस्तत्तत्कार्येषु तेषामुपेक्षा न युक्ता, एवमन्यस्य स्वकार्यक्षमतायाम अन्येन तत्कार्यकरणम् अपि अयुक्तमिति । तत्र राज्ञोऽभावे प्रजासरक्षण ब्राह्मणानामेव कर्तव्यम् । किन्तु तदुपेक्षणमधुना तैः क्रियते इति, एकत कर्तव्यच्युतलोके परिहास्यता, अन्यत ईश्वरकोपपात्रता च एतेषु सवृत्ता वर्तते । एतादृश स्वकर्तव्यभार कथमपि न विस्मरणार्हं उपेक्षार्हो वा ।

स्वकृतस्य शपथस्य अवहेलनम् ।

एवमेव स्वकृतस्य शपथस्यापि अवहेलनम् उक्तवर्गेण क्रियते । बन्धवग्नि-ब्राह्मणादीना समक्ष " प्रजापालनोपयोगिना कतिपय-कर्तव्याना पालन करिष्यामो वयम् " इति प्रतिज्ञा एतै कृता इति तद्विरुद्धाचरणम् एतेषा न युक्तम् । तथा हि " अष्टवर्षं ब्राह्मणमुपनयीत " —इति श्रुतौ,

18985

एव— " गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश " ॥

— इति, मनुस्मृतौ च प्रतिपादित वर्तते । तदनुसारेण अद्यापि द्विजेषु उपनयनसस्कार सानन्द प्रचलति । तत्र प्रत्यक ब्रह्मचारिणे गुरुणा गायत्री-मन्त्र , तथा " दिवा मा स्वाप्सी । ब्रह्मचार्यसि, स्वाध्यायान्मा प्रमद , सत्य वद, धर्म चर, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, कुशलान्न प्रमदितव्यम्, अपोऽशान, यान्यस्माक सुचरितानि तानि त्वयोपास्यानि । " इत्यादीनि राजनीतिदृष्ट्या प्रजा-पालनोपयोगीनि कर्तव्यानि चोपदिश्यन्ते । तत प्रत्यकेन ब्रह्मचारिणा गुरुदेवाग्निबान्धवाना समक्ष " बाढम " इति स्वीक्रियते च । अतस्तद्विप-रीताचरण यद्यस्माभि क्रियेत तर्हि लोके कथ विश्वास्या भवाम. ? इति स्वय सर्वैर्विचार कर्तव्य । सर्वेषा हृदि स्थितेन परमेश्वरेणापि एतादृश-प्रमादशीलेषु उपेक्षा एव क्रियेत । सन्त एव स्वकृत-प्रतिज्ञाया माहात्म्य जानन्ति, अतस्ते कदापि स्वप्रतिज्ञाविरुद्धाचरण न क्रियते इति ते कीर्ति-मन्तो लोकानुरागपात्राणि पारलौकिकश्रेयोभाजश्च भवन्ति । अत्र विषये युधिष्ठिर एवोदाहरणम । ' यत्किमपि वा भवतु, यदेकवार मया उच्यते, ततो न कदापि विचलितो भवेयम् । —" इति तस्य प्रतिज्ञा एव आसीत । अत्रयोदशवर्षं वनवासादिना कष्ट सोढ्वा च तेन स्वीयसत्य-वादिता प्रकटीकृता लोकाना पुरत । यतो यादवादीना प्रियता प्राप्य अगतिपक्षपातिने दुर्योधनाय दण्ड प्रदाय च अन्यायान्मोचितो देश " इति ।

अत्र " ब्रह्मचारिभिज्ञानपूर्वक शपथो न गृह्यते, तद्विषये तेषामज्ञ-त्वात् किन्तु गुरुभिरेव सानुबन्ध शपथ ग्राहयित्वा ते शृङ्खलया बध्यन्ते । अतस्तादृशशपथस्य अपरिपालने न कोऽपि दोष " इत्यर्वाचीनैराक्षिप्येत । अस्येदमेवोत्तर, यद् विद्याबुद्धैर्गुरुजनैर्हितैषिभिस्तादृशनिर्बन्ध एव कुत क्रियते ? इति तै प्रथमतो ज्ञेयम् । यत पूर्वजै स्वय देश-हित-दृष्ट्या नीतिरूपेण तादृशकर्तव्य-पालनेन लोकानुरागो यशश्च स्वप्राप्तम् अतस्तेषा हितसाधनताबुद्धयैव एव क्रियते इत्यवश्य वक्तव्यम् । परमदीर्घदर्शितया पुरोभाविन हितमविज्ञाय मदेन गुरुजनानामुपर्येव दोषदानकल्पनापि एतेषा पशुताया परिचायिकैव । यद्येतेभ्य स्वहितेच्छया पूर्वजै कृत

कर्तव्यनिर्बन्धो न रोचते तर्हि तै क्रियमाणा शिक्षणादीनाम् आयव्ययव्यवस्थापि न्यायालये कथ मान्या भवेद् ? भाविजीवनमुद्दिश्य क्रियमाणत्वात् तस्या इति चेत्तयंवोक्तशपथविषयेऽपि तै कुतो न ज्ञायते ?

आचार-पालनेनैव विश्वास्यता

त्रैवर्णिकानामिव शूद्राणामप्युन्नत्यर्थं तत्तत्कुलोचित-विहित-मन्त्र-दीक्षाया अवसरे पूर्वोक्त-सामान्य-धर्मानुष्ठानम् उद्दिश्य शपथ-ग्रहणम् उक्तम्।

एव स्त्रीणाम् अपि विवाह-प्रसङ्गे सुप्रजाभिवृद्धयर्थं देवा-ग्निगुरु-बन्धूना पुरत शपथग्रहण विहितम्। एतादृश-शपथ-परिपालनेनैव सीता-सावित्र्यादीना यशोऽद्यापि गीयते। तात्पर्यमिदमेव, यत् प्रत्यक्षानुमानशब्दैर् येषा हितसाधनता निश्चिता, तादृश-कर्तव्य-विषये एव पूर्वजैरुपनयनादि-प्रसगेषु शपथो ग्राह्यते, न स्वमन कल्पितेषु। अनस्तादृश-शपथानामुपेक्षा सर्वथा न युक्ता। सम्यग्विचारपूर्वक तादृश-परपरागताचाराणा पालनेनैव लोकेभ्यो विनिर्गता विश्वास्यता अस्मासु पुन स्थिरा भवेत्। तदर्थम् अयमेव मार्गो नान्य इति।

किंच स्थिरमन्त्यर्थमपेक्षित प्रतिग्रहोऽपि एतेषा सविधेऽस्ति। यत एतेषा प्रतिभूत्वशपथयो अनुकूल व्यवहार दृष्ट्वा लोकैरेव केवल न देश-हितदृष्ट्या मठ-मन्दिर-धर्मशालादीना व्यवस्था ब्राह्मणादिवर्गेषु स्थापिता वर्तते, किन्तु भगवता अपि स्वय मूर्तिरूपेण अवस्थाय स्वीयस्नानभोजना-दिव्यवस्थाऽपि एतेषामेव हस्ते समर्पिता इति शास्त्रतो ज्ञायते। एव च प्रतिभूत्वशपथ-परिग्रहा स्थिरमन्त्यर्थम् आवश्यका, एतेषाम् आधारभूत परलोकविश्वासश्च वर्णाश्रमिजनेष्वद्यापि सन्ति। तथाप्येतद्विस्मरणेन साम्प्रत विशेषत प्रजापालने अधिकृतो ब्राह्मणवर्गोऽन्य समाजश्च तद्-विपरीतमार्गेण प्रचलितो वर्तते। एतस्य परिणाम सर्वत्र कलहभेदनीत्या-दीना वर्धनम्। परमन्ते समस्ताना दोषाणाम् उत्तरदायित्व ब्राह्मणानाम् उपर्येव आयास्यति इत्यवश्य ज्ञातव्यम्। अस्मिन् विषये एको दृष्टान्त

* *

ब्राह्मणत्वस्य हि रक्षणेन वैदिक-धर्म-रक्षणम् ।

* *

उच्यते, येनेद स्पष्ट भवेत् । यथा कस्मिंश्चिद् ग्रामे कस्यचिद् धनिकस्य हस्ती यदि मत्त सन् शृङ्खला भङ्क्त्वा निर्गतो ग्रामे सर्वत्र इतस्ततो नागरिकाणा सपत्तेर्नाश कुर्यात तर्हि शासकास्तदुत्तरदायिने स्वामिने एव दण्ड विदध्युर्न तु हस्तिने, तथा समाजो यदि कुपथ-गमनेनाधोगति प्राप्नुयात्तर्हि तदानी समाजधुरीणानामेवाय दोष इति विरोधिनामाक्षेप अवश्यभाव्येव । अत उपर्युक्तस्थिरसविकारणाना विस्मरणम् उपेक्षा वा विश्वासघातरूपत्वाज्जनापराग्रहतु ।

ब्राह्मणानाम् आचार-भ्रष्टतया समाजोऽपि दूषितो भवतीति मनुनाप्युक्तम् —

"शनकैस्तु क्रियालोपादिमा क्षत्रियजातय ।
वृषलत्व गता लोके ब्राह्मणादर्शनेन च ॥" इति ।

"ब्राह्मणस्त्वस्य हि रक्षणेन रक्षित म्याद्वैदिको धर्म ।"— इति च श्रीशकराचार्या ।

वेदप्रामाण्यानभ्युपगन्तृणा विषये न किमपि वक्तव्यमत्र, किन्तु येस्तत्प्रामाण्यमङ्गीक्रियते, तेषा कृते स्थिरसभ्युपायान् स्मरयितु प्रयत्न कृत । यतो हि ब्रह्मोपदेशे शम-दमादि-साधनचतुष्टय-सपन्नानामिव प्रोक्त-सत्यादि-चतुष्टयवतामेव नीत्युपदेशेऽधिकारित्वम् । अतस्तेषाम् उपेक्षणेन ईश्वरस्य समाजस्य च कोपो भवेदिति भारतीयैरस्वस्य भारतीयराजनीति-विषयेऽपि सपूर्णतयाऽवधान देयमिति सानुबन्ध निवेद्यते । यतो विषम-प्रसङ्गेषु कर्तव्य-निर्धारणे न केवल बुद्धे. सामर्थ्यं किन्तु शास्त्रमेव तत्रापि मार्गदर्शक भवितुमर्हति । एव रीत्या पाश्चात्त्य-नीत्यनुसारेण समुपस्थित-स्यैकस्य प्रश्नस्योत्तर यद् द्विसहस्रवर्षेभ्य पूर्वमेव भारतीय-दृष्टया आचार्य-चाणक्येन लिखित तस्यैव स्पष्टीकरण कृतम् ।

अथेदानी पाश्चात्त्य-शैल्या प्रचलिताया निर्वाचन-पद्धत्या स्थिता दोषा भारतीयनिर्वाचनपद्धत्यनुसारेण तन्निवारणोपायाश्च समुपस्थाप्यन्ते।

ये खलु लोकमतानुसारेण कार्यकरणे समर्थास्तादृशामेव मन्त्रिणा शासनकार्ये आवश्यकता भवतीत्यत्र न कस्यापि विवाद येषु च राष्ट्र-

निर्वाचन-पद्धति-दोष-निवारणोपायाः ।

हितोपयोगिनो विशिष्टा गुणा सन्ति, तादृशाना योग्याना निर्वाचन स्व-मतदान-द्वारा समाजेन क्रियते, तद्द्वारा निर्वाचिता एव च शासन-सभा प्रविशन्तीति निर्वाचन-शैली वर्तते । तत्र तादृशेषु राष्ट्रहित-दृष्ट्या ये ये गुणा आवश्यका येषा च परीक्षा राज्ञा जनतया वा कर्तव्या भवति, तेषा परिगणन राजनीति शास्त्रे एव कृतमस्ति यदाह कामन्दक —

" स्ववग्रहो जानपद कुल-शील-बलान्वित ।
वाग्मी प्रगल्भश्चक्षुष्मान् उत्साही प्रतिपत्तिमान् ॥
स्तम्भ-चापल-हीनश्च मंत्र क्लेशसह शुचि ।
सत्य सत्त्व-धृति स्थैर्य-प्रभावारोग्य-सयुत ॥
कृत-शिल्पश्च दक्षश्च प्रज्ञावान् धारणान्वित. ।
दृढभक्तिरकर्ता च वैराणा सचिवो भवेत् ॥
स्मृतिस्तत्परतार्थेषु वितर्को ज्ञान-निश्चय ।
दृढता मन्त्रगुप्तिश्च मन्त्रिसपत्प्रकीर्तिता ॥ इति ।

अत्र बुद्धि-कर्म-सचिवयोस्तारतम्येन कर्मसचिवापेक्षया बुद्धिसचिवस्य मन्त्रिण श्रेष्ठत्व प्रतिपादितमस्ति । यतो बुद्धिसचिवे प्रोक्ता त्रयस्त्रिंशद् गुणा अपेक्षिता, अन्तिम-गुण षट्क-हीनोऽपि तु कर्मसचिवो भवितुमर्हति । उक्तगुणाना व्याख्या क्रमेणैव वर्तते । यथा —

" साङ्कुशता, स्वदेश-जन्म, कुलीनत्व, सुस्वभाव, काय-बलवत्त्व, वक्तृत्व, निर्भीकत्व, शास्त्रज्ञता, दाक्ष्य-शैघ्र्यामर्ष-शौर्य-लक्षण उत्साह, प्रतिभा-शालित्व, निरभिमानित्व, चापल्यराहित्य, मित्रार्जन-कौशलम्, कष्टसहिष्णुता, परीक्षा-शुद्धि, सत्यवादिता, व्यसनेऽभ्युदये चाविकारित्व, धीरता, स्थिरता, प्रभुत्व, नीरोगता, कलानैपुण्यम्, अनालस्य, बुद्धिमत्त्व, धारयिष्णुता, स्वामिभक्ति विरोधनिवारकत्वम्, अविस्मरण, कार्यपरता, विचारशीलत्व, यथार्थनिश्चयवत्त्व, दाढर्यं, रहस्य-गोपन-क्षमता चेति ।

एतेषा राष्ट्रोपकारित्वे न कस्यापि विवादो भवितुमर्हति । प्रत्येक गुणस्य प्रयोजन तु जयमङ्गलादि-नीतिसार-टीकातोऽवगन्तव्यम् ।

* *

मन्त्रिणां व्यसनानि राज्यविघातकानि

* *

एतेषु गुणेषु यदि केषाचन न्यूनता मन्त्रिषु स्यात्तर्हि तदीयशासन-व्यवस्थायामपि न्यूनतया अवश्यभाव्यम् ।

किंच मन्त्रिषु सदा व्यसन-राहित्यमपेक्षितम् । अन्यथा तेषा गरिष्ठत्व च अहित निश्चितमेव । अतस्त्रिवृत्तावपि प्रोक्तगुणानामत्यन्तम् उपयोगो वर्तते । मन्त्रिणा व्यसनानि राज्यविघातकानि भवन्तीत्यत्र नास्ति मतीतिलेशोऽपि ।

तानि च नीतिसारे (१४ सर्गे) वर्णितानि । यथा —

" वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च ।
पान स्त्री मृगया द्यूत व्यसनानि महीपते. ॥
आलस्य स्तब्धता दर्प प्रमादो वैरकारिता ।
इति पूर्वोपदिष्ट च सचिव-व्यसन स्मृतम ॥ इति

एतादृश-व्यसनेभ्य परावृत्तौ, तज्जन्य दोष-परिहारे च कथ पूर्वोक्तगुणानामुपयोग इत्यपि नीतिसार-व्याख्यात एव बोद्धव्यम् । अत्र तु केवल पाश्चात्त्यनिर्वाचनपद्धतेर्दोषस्तत्परिहारोपायश्च विमृश्यते ।

मनुष्यस्य श्रेष्ठता न शरीरधारणमात्रेण, किन्तु गुणानुसारेण भवति । अत एव हितोपदेशे उक्तम् —

" गुणा पूजास्थान गुणिषु न च लिङ्ग न च वय । "

शासनभारो येषु स्थापनीयस्तेषु गुणपरीक्षा राज्ञा तत्स्थानीयया जनतया वा कर्तव्या । अन्यथा शासन-सभा-प्रविष्टेषु कियन्तो गुणा सन्ति ? केषा च न्यूनतेति कथ ज्ञायेत ? अतस्तेषा परीक्षा कर्तव्यतया कामन्दकेन विहिता ।

' उपेत्य धीयते यस्मादुपधेति तत' स्मृता ।
उपाय उपधा ज्ञेया तयाऽमात्यान् परीक्षयेत् ॥ " इति ।

अस्यार्थं — " यथा जपाकुसुम-ससर्गात् स्फटिकोऽपि रक्तो भवति, तथैव शासनसभासदस्योऽय प्रसङ्गविशेष स्वगुणान् परित्यजति न वेति विविध-स्वभाव-युक्तान् जनान् सयोज्य तद्द्वारा तद्गुण-परीक्षा कार्या ।

प्रत्यक्ष-परोक्षानुमेया हि राजवृत्तिः ।

तादृशपरीक्षोपायानामुपक्रमेति सज्ञा " इति । तदुपायाश्च प्रत्यक्षानुमान-शब्दा । तदुक्तम् —

" प्रत्यक्ष-परोक्षानुमेया हि राजवृत्ति । स्वय दृष्ट प्रत्यक्ष, परोपदिष्ट परोक्ष, कर्मसु कृतेन अकृतावेक्षणमनुमेयम् " इति ।

तत्र केषा केषा गुणाना कीदृशप्रमाणद्वारा परीक्षा विधयेत्येतस्मिन् विषये कामन्दकेनोक्तम् । यथा —

" . . . प्रागल्भ्य प्रतिभा तथा ।
कथायोगेषु बुद्धयते वाग्मित्व सत्यवादिताम् ॥
.. . . वैराणामप्यकर्तृताम् ।
प्रत्यक्षतो विजानीयाद् भद्रता क्षुद्रतामपि ॥ " इति

अयमर्थ — निर्भीकत्वादय प्रोक्ता गुणा लोकप्रियतारूपा भद्रता, क्षुद्रपरिवारता च, वादगोष्ठया सम्यगायोजनपूर्वक तत्र स्वयम् उपस्थाय प्रत्यक्षत परीक्ष्या इति । इतरत्र सामान्यत प्रवक्तृणामप्येतादृशविचारगोष्ठी-प्रसङ्गे न सम्यग्-वक्तृतादीना प्रादुर्भावो भवतीति तत्रैव तेषा परीक्षण विहितम् । एवरीत्या परीक्षित-गुणाना तु सदस्यानामादर अवश्य कर्तव्य. समाजेन ।

अनुमानेन परीक्ष्या गुणास्तु —

" उत्साह च प्रभाव च तथा क्लेश-सहिष्णुताम् ।
धृति चैवानुराग च स्थैर्य चापदि लक्षयेत ॥
परिकर्मसु दाक्ष्य च विज्ञान धारयिष्णुताम् ।
गुणत्रय परीक्षेत . .
भक्ति मैत्रीं च शौच च जानीयाद् व्यवहारत ॥ "

— इत्यनेन प्रोक्ता । आपद्यपि स्वकर्तव्यनिष्ठया उत्साहादिगुणाना निर्णयो भवति। " प्रारब्धमुत्तमजना न परित्यजन्ति । " —इति न्यायेन

ये खलु विचारपूर्वकमेव कार्यण्यारभ्यन्ते, आसमाप्ति तत्र प्रयत्यते च, तेषु धृत्यादयोऽनुमातव्या ।

कस्मिंश्चिद् विशिष्टकार्ये नियुक्तानां रहसि धनादि-प्रलोभन-द्वारा "एते शत्रुभेद्या न वा" इति परीक्षणं कृत्वा तेषु भक्त्यादय सिद्ध्यन्ति ।

पुरा गुणपरीक्षणानन्तरमेव युवराज-नियुक्तिः ।

विषयेऽस्मिन्न केषाञ्चिद् वैमत्य वर्तते । अत एवाद्यापि अधिकारि-वर्गेणैतदुपायै परीक्षण क्रियते । एवमेव पुरा राजभिरपि गुणपरीक्षानन्तरम् एव योग्या स्वपुत्रा यौवराज्ये नियुज्यन्ते स्मेति पुराणादिषु वर्णनम् उपलभ्यते । लोकमतरूपेण शब्दप्रमाणेन परीक्ष्या गुणाश्च —

"साधु तेषाममात्यानां तद्विद्भ्यश्च बुद्धिमान् ॥
चक्षुष्मतां च शिल्पं च परीक्षेत गुणत्रयम् ॥
स्वजनेभ्यो विजानीयात् कुल स्थानम् अवग्रहम् ।
सखासिभ्यो बलं सत्त्वमारोग्य शीलमेव च ।
अस्तब्धतामचापल्य ।" इत्युक्तं

अस्यार्थं —विदुषां सजातीयानां, सहवासिनां च बहुमतेन विभिन्न-गुणानां परीक्षणम् आवश्यकम् इति ।

विषयप्रसङ्गेषु शास्त्रमेव मार्गप्रदर्शकं न तु बुद्धिमात्रं तन्निराकरणे प्रभवतीति मन्त्रिषु विद्वत्ता अपेक्षिता । तदुक्तं किरातार्जुनीये —

"मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥" इति ।
"विद्वानेव विजानाति विद्वज्जन-परिश्रमम् ।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥" इति

न्यायेन विद्वत्तापरीक्षाया विदुषां बहुमतमेव आदर्तव्यं नान्येषाम् । अतोऽद्यापीद दृश्यते, यद् विश्वविद्यालयीयादि-प्रमाणपत्रानुसारेणैव उन्नत-स्थानेषु जनानां विनियोजनम् । अत्रविषये भारतीय-पाश्चात्यनीत्योर

THE KUPPUSWAMY SASTRI

महदन्तर विद्यते । यतो हि, भारतीय-नीतिशास्त्रानुसारेण शासन-सभा-सदस्याना सर्वेषामपि पूर्णतया विद्वत्ताऽपेक्षिता । पाश्चात्यनीतौ तु कतिपयानाम् एव अत्यल्पमङ्ख्याकाना विद्वत्-प्रतिनिधीनामपि स्थान कल्पितमिति सर्वेऽवस्या नावश्यकत्वम् । एतेन ज्ञायते, यत् मत-गणनाया न विदुषा वैशिष्ट्यम् अपेक्ष्यते, किन्तु सर्वसाधारण्येन बहुमतमात्रम् । अत शासनसभाया विदुषा बहुमत दुलभ भवति । अस्य परिणाम सर्वेषु राजकार्येष्वेकसूत्रता विरहो विशृङ्खलता च । अयमेव महान् दोष पाश्चात्य-नीते ।

पूर्वं निर्वाचनपद्धति-निर्देशः सवासि-मत-शब्देन ।

मन्त्रिषु विद्वत्ताया इव लोकमतस्यापि परीक्षा भारतीय-नीति-शास्त्रे उक्ता । अत प्रचलद्-रूढा निर्वाचन-पद्धतिरधुनैव प्रचलितेति न, पूर्वमप्यासीत् । किन्तु सवासि-मत-शब्देन साऽपि तत्र निर्दिष्टा । सदस्यो यस्मिन् क्षेत्रे वसति, तत क्षेत्रवासिभिरय शासन-सभासदत्व-योग्य इति यन्मतदान क्रियते, तादृश-लोकमतस्य आवश्यकताया रहस्य किंचिद् विव्रियते ।

नागरिक कोऽपि कुत्रचित् स्वनिवासात् पूर्वं समीपे कश्चित्सुशील सज्जनो वसति न वेति स्त्री-पुत्र-धनादीना सरक्षणचिन्तयाऽवश्य पश्यति । यत सर्वजुष्टे गृहे इव दुष्टाना प्रतिवेशे वसतिरप्यतिभयकरा । तत्र न केवल स्त्रीणा सती-त्व-रक्षाया असभव किन्तु प्राण-रक्षाया अपि । न्यायालये साक्ष्यदानार्थमपि न कोऽपि मन्नद्धो भवेत् तत्र । यत्र तु बलवन्त सज्जना निवसन्ति, तत्र निवासेन हि तत्सहवास-जन्यस्तदीय-सुस्वभाव-सक्रमोऽन्येष्वपि भवति । तेन चान्योन्य सर्वेषा सौख्य सपद्यते । अत एव कामसूत्रे उक्तम् —

" नगरे पत्तने खर्वटे वा महति सज्जनाश्रये स्थानम् ॥ इति । "

अतश्च राज्ञा तत्स्थानापन्नजनतया वा तादृश स्थानमेव प्रथमतो ज्ञेयम्, यत्र लोक-विश्वास-पात्रस्य सुस्वभावस्य च पुरुषस्य वासो भवेत् ।

यतो हि — तादृशस्य योग्यपुरुषस्य निर्वाचनेन राज्ञ शासन-सस्थाया वा महत्त्व, तत्र लोकविश्वासश्च वर्धेत ।

निर्वाचनद्वारा इदमेव ज्ञायते, यत् शासनसभा-सदस्यत्व-योग्यो निर्विरोधो निर्दोष सुशीलश्च पुरुष क ? इति । तत्र बलसत्त्वारोग्या-दीना ज्ञान यथा निकटवर्तिना सुलभ तथा न दूरवर्तिनाम् । एतदनु-रोधेनैव —

"पश्य लक्ष्मण ! पम्पाया बक परमधार्मिक ।
शनै शनै पद धत्ते जीवाना वध-शङ्कया ॥

इति श्रीराम-लक्ष्मणयो सवाद मनि बकमुद्दिश्य **"सहवासो विजानाति चरित्र सहवासिन ।"**— इति मत्स्यानामुत्तर वर्णित रामायणे । यतोऽनया निर्वाचन-पद्धत्या सदस्य-स्थितिना प्रोक्त बलादि-गुणाना परीक्षाया सभवस्ततो राजनीतिज्ञै प्रचालितेय निर्वाचन पद्धति समीचीनैव ।

सत्त्व तु राजनीतेः प्राणा. ।

पूर्वोक्तबलादिपदानामर्थोऽर्थशास्त्रे एव वर्णित । बल नाम युद्धादि कार्य-सामर्थ्यम् । सत्त्व तु अत्यन्त-महत्त्वपूर्ण राजनीते प्राणा एव । अतस्तद्विषये स्वतन्त्ररूपेणाग्रे विचार करिष्यते । सक्षेपत्त निसदि-ग्धतया नीतिमार्गानुसरण नदिति वक्तु शक्यम । आरोग्यम—शरीरे वात-पित्तादीना साम्य, तदुपाया आयुर्वेद-योगशास्त्रादिषु वर्णिता । शील सत्त्वपरिचायक सुस्वभावरूपम् । एतेषा गुणाना परिचय प्रतिवेशिनाम् । अतस्तैर्निविरोधम एतादृश गुण-युक्ताय स्वेच्छया मतदान क्रियते । तथा हि — वैवस्वतमनुना न राजपद काङ्क्षितम् । न वा तदर्थं कोऽपि प्रयत्न प्रचारो वा कृत । पर परस्पर मात्स्यन्यायेन पीडिताभि प्रजाभिरेव स्वय साग्रह गुणितया तस्य स्वशासक-पदे स्थापन कृतम् । तदुक्तम् —

"मात्स्यन्यायाभिभूता प्रजा मनु वैवस्वत राजान चक्रिरे ' इति ।
संवासिभ्यो बल सत्त्वम् । इति वचनस्यापि अयमेव आशय ।

अस्मिन्नशे भारतीयपाश्चात्यराजनीत्यो साम्य दृश्यते, पर केवलम्

एतावता सदस्यत्व-योग्यता-निर्णय-पूर्वक शासनसभाप्रवेशानुमतिर्भारतीय-नीतिदृष्ट्याऽत्यन्त दोषावहा । किञ्चहुना, एतस्यैव दोषस्य परिणामोऽधुना सर्वत्र •अशान्ति-रूपेणानुभूयते लोकैः । तन्निवारणोपायस्तु भारतीये नीतिशास्त्रे एव वर्णित ।

मनुष्य-मात्र-स्वाभाविकः सत्ता-मदः ।

उपर्युक्तगुणवत्तामात्रेण निर्वाचितस्य मन्त्रिपद-प्राप्त्यनन्तर सत्ता-दि-मदेन स्वभावपरिवर्तन शनैः शनैर्न भवेदिति कथ वक्तु शक्यम ? यतो मनुष्यमात्रे स्वाभाविक एवैष सत्तामदो नाम । यस्य च गुर्वाज्ञाव्यतिक्रम सुहृदामप्यनादर इत्यादयोऽनुभावा । अत एवोक्त चाणक्येन—

"**अध्रुवसधर्माणो हि मनुष्याश्चित्तानित्यत्वात् कर्मसु नियुक्ता विकुर्वते**" इति ।

नित्यत्वादितिपदम् अतिगम्भीरार्थकम् । तथाहि मनुष्यस्य शोभना हि सस्कारा निमित्तविशेषात् नूतन-सस्कारैरभिभूयन्ते इत्यनुभवसिद्धम् । तत्र येषा सस्काराणा साहजिकत्व ते स्वभाव-पद-वाच्या । निमित्त-विशेषात् स्वभावमभिभाव्य येषाम् उत्पत्तिस्ते चित्तपदवाच्या भवन्ति । तदुक्तम् "**स्वभावचित्तज्ञतया युक्तम् (१९-३६)**" इति नीतिसारे श्लोक व्याख्यावसरे जयमङ्गलायाम ।

"**तत्रात्मवादीनां सहजो धर्म स्वभाव, आकस्मिकश्चाभिप्राय-श्चित्तम्**" इति । चित्तस्य स्वभावाभिभावकत्वे उदाहरणमिदमेव, यदर्जुनस्य क्षत्रियत्वोचितयुद्धसस्कारसत्त्वेऽपि महाभारत-युद्धावसरे धनु-स्त्यागपूर्वक श्रीकृष्ण प्रति "**गाण्डीव स्रसते हस्तात् त्वक्चैव परिदह्यते**" इत्यादिना दैन्य-भाव-प्रकटनम् । एतत् तत्त्व विजानता श्रीकृष्णेन ज्ञानो-पदेशद्वारा तस्य आकस्मिकी मलिनता दूरीकृत्य पुन तत्स्वभावस्योदबोधन कृतम् । अतो धार्मिके ज्ञानवति च पुरुषे एव चित्तरूप-बाह्य-सस्काराणा प्रभावो न स्थिरो भवतीति सिध्यति । ये खलु न तादृशास्तेषून्नत-पद-स्थित्या अपि मदादीना प्रादुर्भावो यथा न स्यात्तथा कश्चनाङ्कुशोऽपेक्षित

इति, अर्थशास्त्रे तादृशी व्यवस्था अपि उक्ता । इदमेव भारतीयराजनीतेर्वैशिष्ट्यम । अत्रैतादृशी परीक्षापि विहिता, यस्या पाश्चात्त्यनीत्यनुसरणेन असभव एव । अस्या परीक्षायाम् उत्तीर्णस्य तु शासनसभाप्रवेशे सपूर्णा योग्यता भवति । इय परीक्षा कामन्दकेन— "स्वजनेभ्यो विजानीयाद्" इत्यत्रोक्ता ।

निर्वाचने यथा विदुषा साधारणजनतायाश्च बहुमतस्य अपेक्षा विद्यते, तथैव तत-सजातीयानामपि स्वतन्त्ररूपेण बहुमतमपेक्षितम् । येन तत्कुलादि-परीक्षण भवेत् । यत सजातीये सह विवाह-सस्कार सर्वेषां भवति, तैरेव कन्यावरपक्षयो परस्पर मेलनस्य क्रियमाणत्वात् । अत कुलस्य शुद्धता त एव ज्ञातु प्रभवन्ति । परमस्या कुलीनतायाया उपेक्षा अधुना सर्वे क्रियते तत्परिणामोऽतिगम्भीर-क्षतिकरो भविष्यति । तथा हि — मन्त्रिण कुलीनत्वाभावे स्वभावसिद्धानामपि सत्त्वशीलादीनाम् आनुकूल्येन कार्यं कर्तुं न शक्नोति स । केवल शिक्षया तादृश-क्षते पूर्ति कदापि न कर्तुं शक्यते । कुलीन एव विपत्काले अपि सोत्साह स्वकर्तव्यपालन कर्तुं प्रभवति नान्य । तदुक्त कामन्दकेन (८ सर्ग)

"समुत्पन्नेषु कृच्छ्रेषु दारुणेष्वप्यसशयम् ।
दर्शयेत् स्वच्छहृदय कुलीनश्चतुरस्रताम् ॥"— इति ।

अस्य श्लोकस्यावतरणिकाया सत्कुलमित्यस्य प्रयोजनमाह — समुत्पन्नेष्वित्यादि इत्युक्त जयमङ्गलाकारेण ।

आयुर्वेदानुसारेण नियम-युक्तयोरुत्तम सस्कारवतोश्च स्त्रीपुरुषयो रजोवीर्य-सयोगेन विनीताया नीति-कुशलायाश्च सततेरुत्पत्तिर्निश्चिता वर्तते एतादृशी सततिरल्पेनैव कालेन नीतिज्ञा सती राजकार्य-निर्वहणे समर्था भवति । महाकविना कालिदासेनापि कुलीनताया स्वरूपमेवम् एव वर्णितम् —

युवा युगव्यायतबाहुरसल कपाटवक्षा परिणद्ध-कन्धरः ।
वपुःप्रकर्षादजयद्गुरु रघुस्तथापि नीचैर्विनयावबुध्यत ॥— इति ।

आपत्काले कुलीनताया कथमुपयोगो भवतीति कर्णार्जुनयोर्युद्धप्रसङ्गेन ज्ञातु शक्यम् । तथा हि — समराङ्गणेऽर्जुन जेतु क्रुद्धेन कर्णेन

असकृद् बहु प्रयतितम् । पर यदा यदाऽर्जुनेन तद-बाण-प्रतिरोध-पुरस्सर तस्योपरि बाण-प्रहार कृतम्तदा तदा त सोढुमशक्तेन तेन तत पलाय्यते स्म । तथाप्यात्मान सून-पुत्र मन्वानस्य तस्य न कदापि लज्जाया अवमानस्य वाऽनुभवो जात । अत्यन्त पोडितेनाप्यर्जुनेन तु युद्धात् पलायन क्षत्रिय कुल-मर्यादा-विरुद्धत्वाद् अनुचितमिति मत्वा स्थिरतया विजयश्रिय प्राप्यैव रणान्निवृत्तमिति । कुलीनताया इदमेव प्रयोजनम । अत एव भोजराजनापि तस्या प्रशसा कृता ।

सत्त्वात्मनाममलधर्मविशेषजन्मा
जन्मान्तरानुभववासनयाऽवतीर्ण. ।
सर्वात्मसपदुदयातिशयैकहेतुर्
जागर्ति कोऽपि हृदि मानमयो विकार । इति ।

अद्याप्युत्तमजातीयाना पशुफलान्नादीना निर्माणार्थं तादृशजातीय-बीजसरक्षणे यतो वैज्ञानिकै प्रयत्यते, ततो यासु राष्ट्रहितस्य निभरस्ता-दृशीना सुप्रजाना निर्माणार्थं कुलीनतारक्षणविषयेऽपि नीतिज्ञानामवधानम् अवश्यमाकृष्ट भवेदव । अस्मिन् विषये इतोऽन्यत्किमु वक्तव्यम् । अत्र कुलीनताया यथा लाभस्तथा हानिरप्यस्ति, तथा हि – भारतीयराजनीत्य-नुसारेण शासनसभा-प्रवेशाधिकार कुलीनानामेवेति, अन्यै कदापि मन्त्रिपद न प्राप्य स्याद् अतोऽर्थवैषम्यरूपो दोषोऽत्र वर्तते इत्याक्षेप कैश्चित्क्रियेत । तस्य कारण तु भारतीय-राजनीतेरज्ञानमेव ।

अकुलीनानामपि मन्त्रिपद काङ्क्षन्तस्ते प्रष्टव्या शासनसभाप्रवेशो गुणानुरोधन भवतामभीष्ट उत गुणहीनानामेवेति । तत्र गुणानुरोधनेति अवश्य वक्तव्यम । यतो गुणहीनात् पुरुषान्मातापि पराङ्मुखी भवति, एव चान्येषा का वार्ता ? तदुक्त नीतिसारे—

अलसस्याल्पतोषस्य निर्विद्यस्य कृतात्मन. ।
प्रदानकाले भवति मातापि हि पराङ्मुखी ॥

इति । एतादृशानामन्यत्र चारित्रार्थ्ये समवति शासनसभायामप्रवेशो राष्ट्रहितदृष्ट्या न दोषावह ।

किं च गुणवत्स्वपि उत्तम-मध्यमाधम-रूपेण त्रैविध्यमपरिहार्यमेव ।

ब्राह्मणान्त्यजयोर्न वैषम्यं युक्तम् ।

तत्र ये खल्वधिकगुणवन्त उत्तम-श्रेणीस्थास्तेभ्य एव प्रथममवसरो देयः शासनसभायामिति के नाम नीतिज्ञा न मन्यन्ते ? एतेषु यदि कुलीनताया अपि उपलब्धि स्यात्तर्हि तेभ्य मन्त्रित्व-पद-दाने का वा आपत्ति ?

अत्रेदम् अवधातव्यम् । यस्मिन्वाचने कुलीनतायाः एव न मुख्यत्वम् । यतस्तत्-तत्-पदोपयुक्त-कुलीनत्वस्य सत्त्वेऽपि यद्यन्येषामावश्यक-गुणानाम् अभावो दुर्गुणो वा यस्मिन्नस्ति स तत्रानधिकृत एव भवति, अत कुलीनता-मात्रेण न काप्यसिद्धिरिति। गुणसपन्नाना तत्-तत्-पदयोग्याना कुलीनानाम् अलाभे तदन्य-कुलीनेभ्योऽपि परीक्षितेभ्य **अब्राह्मणादध्ययनमापत्काले विधीयते** । इति न्यायेन तन्मन्त्रि-पद-दान भारतीयार्थशास्त्रे विहितम् । तदुक्त कामन्दकेन (५ – ६) —

गुणैरुदारैः सयुक्तान् प्रोन्नयेन्मध्यमाधमान् ।
महत्ता प्राप्नुवन्तस्ते वर्धयन्ति नरेश्वरम् ॥ — इति ।

उत्तमपदमारोपितेभ्यो मध्यमाधमकुलीनेभ्योऽपि गुणयुक्तेभ्यो वेतन तु तत्-पद-योग्य-कुलीनाना कृते यावद्विहित तावदेव देयम् । भारतीयराजनीत्यनुसारेण विभिन्न-जाति-पबद्धाना तत्तत्कार्याणा कृते तत्तज्जातीयैरेव निर्वाचिताना सर्वेषा मन्त्रिणा मदम्याना वाऽधिकारसाम्याद् वेतन-साम्यम् आवश्यकम् । तत्र ब्राह्मणान्त्यजयोर्न किंचिदर्थ-वैषम्यमधिकार-वैषम्य वा युक्तमिति । अतोऽनया व्यवस्थया भारतीय-राजनीतेरुपरि क्रियमाण आक्षेपो न कथमपि युक्तो भवितुमर्हति । पर तत्रैतावत्सिर्बन्धोऽवश्य वर्तते, यद् विभिन्न-जातीयाना मन्त्रिणा भोजन-यान-विवाहादयो व्यवहारा तत्तज्जातीयपरम्परागतमर्यादाम् अनुसृत्यव आवश्यका, यतस्तेषा कुलशुद्धयाऽग्रेऽपि राष्ट्रकार्यार्थं गुणयुक्तानामेव प्रजानाम् उपलब्धि स्यादिति । तदुक्त कामन्दकेन —

" **उत्तमाभिजनोपेताञ्न नीचैः सह वर्धयेत् ।** " — इति । उत्तमान् अभिजनयुक्तान् नीचैः सह न वर्धयेत तत्तुल्यमानान् न कुर्यादित्यर्थः. इति तद्व्याख्यायामुक्तम् । भोजनादिव्यवहारेषु तयोर्निश्चण न युक्तमित्याशय.। अत एव—

आहारेष्वथ योनौ च बीजे कर्मणि चापि य ।
शुचि कृच्छ्रगतस्यापि न पापे रमतेऽस्य धी ॥

— इत्युक्त कौटिलीयार्थशास्त्रे । अयमेव च राष्ट्रोपयुक्त-सत्पुत्र-निर्माणोपाय ।

प्रसङ्गवशादिदमपि वक्तव्यमापतति यत् आर्थिकसाम्यमिव सर्वथा कृते कामसाम्यमपि यदीष्येत तर्हि कालत्रयेऽपि तस्यासभव एव । तथापि तत्र प्रयासे क्रियमाणेऽवश्य सुन्दोपसुन्दवद् दशा भवेदिति ।

काम-साम्ये सुन्दोपसुन्दवद् दशा भवेत् ।

महाभारते इय कथा प्रसिद्धा । सुन्दोपसुन्द-नामानौ भ्रातरौ **कस्यामपि परिस्थितावावाभ्या परस्पर न योद्धव्यम्** इति निश्चित्य अन्येभ्यो वधस्य शङ्कया च **स मा भवतु**–इति वर ब्रह्मणस्तपस्याद्वारा प्राप्तवन्तौ । इत्थ त्रिलोक्यामप्यवध्यौ भूत्वा बहुकाल स्थितावपि कदा-चित्तिलोत्तमा सुन्दरी दृष्ट्वा कामातुरौ सन्तावन्योन्यमेव युद्ध्वा (?) मृताविति ।

सजातीयद्वारेत्र क्रियमाणाया स्थान-परीक्षाया प्रयोजन तु सद-स्योऽमात्यो वा तत्-तद्-देशाचारपरम्परा तदीय-व्यवहारादीश्च जानाति न वेति ज्ञानम् । तत्-तद्-देशाचारादिव्यवहारसरक्षण च राज्ञ कर्तव्यमेव । अनेनैव च जनतन्त्रस्यापि वास्तविक रूप सिद्धयति । यतोऽनेन कस्मिंश्चिद् बलात्कारप्रसङ्गो न भवेत ।

एवमय निरङ्कुश साङ्कुशो वेति ज्ञानमपि राज्ञो जनतया वा आवश्यक, येन स शीलादिभ्यो न विचलिष्यतीति ज्ञायते । तदपि सजातीय-द्वारेव भवितुम अर्हति, यत उच्चपदस्थितेनापि भोजन-विवाह-व्यवहारस्तै सह कर्तव्यो भवति, अतो जातीय-बन्धन तेन सहसा न निवारयितु शक्यम् । जातीयमर्यादोल्लङ्घने जाति-बहिष्कृतो भविष्यामि इति भयेनायम् उत्पथगामी न भवेत् । अथवा यत्किञ्चिदकार्यकरणादिना तत्सबधिभिस्तेन सह व्यवहारे औदासीन्ये स्वीकृते पुनस्तत्र प्रवृत्तिर्न भवेत

= KUPPUSWAMY SASTRI

तस्य। तथा च जातीया एवाङ्कुशरूपा सन्त तम् अकार्यान्निर्वर्तयितु प्रभवन्ति नान्ये। अतो जातीय-मर्यादा-पालन नियन्त्रणदृष्ट्याऽत्यावश्यकम्। जातीयैरपि तस्य साङ्कुशत्व विज्ञायैव तद्विषये मतदान कर्तव्यम्। अन्यथा भारतीय-राजनीत्यनुसारेण अमा-येन यदि कश्चनापराधः क्रियेत, तर्हि तद्-दण्डभावत्व नज्जातीयानाम् अपि भवति। अयमेव विशेषो भारतीय-राजनीते ।

* *

शासनसंस्था-भयाभावेन सर्वत्र मात्स्य-न्यायः स्यात्।

* *

तथा हि-शासन-कार्यार्थं भारतीय-राजनीतौ प्राधान्येन अष्टादश विभागा निर्दिष्टा तेषु विभिन्न-कार्योद्देशेन विभिन्न-जातीय-मन्त्रिणो निर्वाचिता भवेयु । तत्रोदाहरणार्थं तत्रत्य एको विषय प्रस्तूयते। भारतीय-राजनीत्यनुसारेण सुवर्णाध्यक्ष-निर्वाचन स्वर्णकार-जातीयैरेव कर्तव्यम्। केषाञ्चिद् आभूषण-निर्माणम् अभीष्ट चेत् तद्-विभागद्वारा कारयितु शक्य भवति। तत्र यदि सुवर्णचौर्यं न्यायालयत सिद्ध भवेत् तर्हि तदुत्तरदायित्व सुवर्णाध्यक्षस्यैवेति तद्-वेतनात् क्षति-पूर्ति राज्ञा कर्तव्या। वेतनापेक्षयाऽधिकक्षतौ तु तन्निर्वाचनकर्तृणा तज्जातीयानाम् उपरि दण्डो विधेय इति। एवम् एवान्यत्र ज्ञेयम्।

अतोऽनया रीत्या मतदानसमय एव उच्छृङ्खलस्य निर्वाचन यथा न भवेत् तथा तत्तज्जातीयैरवहितैर्भूयेत। किञ्चानया पद्धत्या योग्यरीत्या मतदाने प्रवृत्तिरपि जनताया जागृता स्यात्, अमात्योऽपि जातीयमर्यादापालनद्वारा जनताया स्थायि-विश्वास-पात्रतार्थं सदा प्रयत्नशीलो भवेद् इत्ययम् एव जातीय-निर्वाचनान्महान् लाभ ।

एव रीत्या विद्वन्मत, जातीय-मत, लोक-मत, प्रत्यक्षमनुमान चेति पञ्चभिरुपायैः परीक्षिता मन्त्रिण शासनसभा प्रविश्य शासन-कार्ये सपूर्णतया सहायका यदि भवेयुस्तर्ह्यवश्य गोरूपा इय पृथिवी वत्सस्थानीयाया जनताया कृते स्वय सपद्-धारा प्रवाहयिष्यतीत्यत्र नास्ति सशीति-लेशोऽपि। एतादृश-निर्दुष्ट-व्यवस्था भारतीय-राजनीतिम् अन्तरा अन्यत्र तु अत्यन्त दुर्लभैव ।

अपराधानुसारेण दण्ड-व्यवस्था विधायापि लोकप्रियता-सपादन-पूर्वकं जनताया शासन-सस्थायाः पूज्यत्व-बुद्धिनिर्माणम् अतिदुष्करम् दण्ड-व्यवस्थया अपराधिना सपत्तिहरणे वधदण्डे वा करणीये जनताया कोपस्य प्रभाव्यमानत्वात् । दण्डो यदि न दीयेत तर्हि शासनसस्थाया एव अन्यथा-सिद्धत्व भवेत् । शासन-सस्था-भयाभावेन च सर्वत्र मात्स्य-न्यायः प्रचलेत् । तदुक्त कामन्दकेन—

"परस्परामिषतया जगतो भिन्नवर्त्मनः ।
दण्डाभावे परिध्वसी मात्स्यो न्याय. प्रवर्तते ।" इति ।

अतो दण्डविधानम् आवश्यकम् । भारतीय-व्यवस्थानुसारेण अन्य-जातीय-मन्त्रिणा तदनुगामिना च समर्थन प्राप्य एकजातीयमन्त्रिणोऽपराधे तज्जातीयेष्वपि दण्ड-विधान सुशक भवति । एतादृश-दण्ड-भयमेवान्येषु मन्त्रिषु तदनुयायि-वर्गेषु च सम्यङ्नीतिमार्गानुसरणे प्रवृत्तिम् उत्पादयेत् । जातिव्यवस्थामन्तरा सर्वसाधारणेन लोकमतेन निर्वाचितस्य मन्त्रिणोऽ-पराधे यदि सर्वेषा मतदातृणामुपरि दण्ड-विधान-प्रसङ्ग स्यात्तर्हि अवश्य जनताया कोपपात्रीभूय शासन-सस्था न बहुकाल स्थिति लभेत । अत एवोक्त कामन्दकेन—

"उद्वेजयति तीक्ष्णेन मृदुना परिभूयते ।
दण्डेन नृपतिस्तस्माद् युक्तदण्ड प्रशस्यते ॥" इति ।

अयमर्थ — यादृशो दण्डो लोकविद्वेषजनको यादृशश्च शासनसस्थाया एव व्यर्थता सपादयेत् तदुभयस्माद्भिन्न सुप्रयुक्तो दण्ड एव प्रशस्त इति । वर्तमान-पाश्चात्य-नीतौ तु मन्त्रिणा महत्यपराधे कृतेऽपि शासनसस्थया तत्क्षेत्रीयेभ्य सर्वेभ्यो मतदातृभ्यो दण्ड-दाने साहस कर्तु न पार्यते । निर्वाचने जाति-नियमाभावेन च जनताया सविध येन मन्त्री निगृहीत. स्यात् तादृशम अङ्कुशरूप जातिनियमनमपि नास्ति । एतस्य दुष्परिणाम अयमेव यन्मन्त्रिभिर्निर्भयतया प्राप्ताधिकारस्य पदस्य च दुरुपयोग क्रियते । विशेषत सौजनस्यापि विस्मरण तेषा भवति । एतद्-दोषस्य निवारणोपाय. कोऽपि जातीय-मर्यादाया उच्छेदिकाया वर्तमान-राजनीतौ नास्ति ।

निर्दोषा भारतीया निर्वाचन-शैली ।

एतावता प्रत्यक्ष-परोक्षानुमान-रूप-प्रमाण-त्रयेण भारतीय-निर्वाचनशैल्या निर्दोषत्व प्रतिपादितम् ।

साम्प्रत शासन-कार्यार्थं राष्ट्रे सदा गुणिना सौलभ्य कथ भवेत् ? कथ च गुणिनामेव परपरा उत्तरोत्तर वर्धतेति विचार्यते ।

प्रायोऽधुना सर्वेषामेव नीतिज्ञाना बुद्धिरस्मिन् विषये सल्लग्ना वर्तते । परम् अद्यापि परिणाम-सुखद सुलभो मार्गो नोपस्थितः ।

विषयेऽस्मिन् भारतीय-राजनीत्या निर्दिष्ट उपाय सुसगत परिपूर्णश्चेत्यग्रिम-विवेचनेन स्पष्ट भवेत् । तत्र तेषा तेषा प्राक्तन-सस्कारानुरूप्येणैव गुण-वर्धनोपाय विभिन्न-सस्काराणा सङ्करो मा भूदिति तन्निवारणोपायश्चोपदिष्टो वर्तते ।

शासनसस्थाया मुख्य प्रयोजन प्रजाना धर्मार्थ-काम-समृद्धि-सपादनम् एव । तच्च गुणातिशयवता सहयोगेनैव सभाव्येत । अतस्तद्द्वारा राष्ट्रे अपेक्षिताना ज्ञान-सुरक्षा-वाणिज्य-शिल्पादीना व्यवस्था कर्तव्या भवेत् । अपेक्षित-सर्वविध-कार्योद्देशेन शासन-सस्थयैव वेतनादि-व्यवस्थायाः सपादनम् अशक्यम् एव । तादृश-व्यवस्थाया सभवेऽपि वेतन-द्वारा देश-कार्य-सपादन-दृष्टिरेव प्रथमतोऽसङ्गता । यतो हि कस्मिन्नपि कार्ये यावन्मनुष्य स्वकर्तव्यबुद्ध्या सोत्साह स्थिरतया न लगति, तावत्तत्र गुणानां विकासोऽसभवी । किंच वेतनमात्र लक्ष्यीकृत्य प्रवर्तमानो न कदापि कार्यकरणे परिश्रम सहेत । द्रव्यसपादनशीलश्च मनुष्यो यत्राधिक-वेतन-लाभसभावना स्यात्तत्रैव प्रवर्तमान कदाप्येकत्र स्थिरो न भवेत् ।

गुणानुरोधेन विना न सत्क्रिया ।

भारतीयेतिहासतोऽवगम्यते, यद् येन यावन्मात्रया राष्ट्रकार्ये स्वकीय गुण-वैशिष्ट्य प्रदर्शयंते, तावन्मात्रया तदीय-व्ययानुसारेण च शासनसस्थया तस्य पुरस्कार. समाननरूपेण कर्तव्यो न तु वेतनरूपेणेति।

अत एवोक्त भारविना जनानुराग-सपादक-दुर्योधन-कार्य-वर्णन-प्रसङ्गे किरातार्जुनीये—

"प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया"—इति ।

धर्मो नारायणः स्वयम् ।

मानवसमाजेऽस्मिन् वर्गद्वय दरीदृश्यते । तत्रैकोऽर्थप्राधान्येन स्वकीयगुणोत्कर्षविधाने सँल्लग्न । अपरश्च केवल देशहितदृष्टचा स्वकर्तव्यपर । अत्रैव वर्गे भारतीय-राजनीतेर्निर्भर । अत एव कर्तव्यबुद्धि-प्रयुक्त-गुणोत्कर्षानुसारेण राज्ञा प्रजाना समादर कर्तव्य इति तत्रोक्तम् । अतो वेतनमात्रस्य लक्ष्यता-सपादिकाया पाश्चात्यनीतेरपेक्षयेय नीतिरत्यन्तसमीचीनेत्यवश्य वक्तुम् आयाति । एतादृश-व्यवस्थाया प्रचारार्थमेतदतिक्रमणकारिभ्यो दण्डविधानमन्तराज्यत्र किंचिच्छासनसस्थाया कार्यं वर्तते । तदुक्त कामन्दकेन—

"सर्वस्यास्य यथान्याय भूपतिः संप्रवर्तकः ।" इति ।

एतादृश्या कर्तव्याधिष्ठिताया व्यवस्थाया वेदाज्ञारूपेण ग्रहणे सति धर्म-रूपता, अस्या एव लोकहितोद्देशेन देशसेवा-दृष्टचा ग्रहणे नीति-रूपता च भवतीति पूर्वमुक्तमेव । एतादृशधर्मनीत्योरस्य मुख्य प्रयोजनम् । यतस्तदुच्छेद एव देशपराभवहेतु । तदुक्त "यदा यदा हि धर्मस्य" इति गीताश्लोकव्याख्यानावसरे सच्छिरोमणिना ज्ञानेश्वरेण—

"अधर्माची अवधि तोडी । दोषाची लिहली फाडी ।
सज्जना करवी गुढी । सुखाची उभवी ।
दैत्यांची कुले नाशीं । साधूचा मान प्रिवसी ।
धर्माशीं नीतिशीं शेज भरीं" इति ।

अत्रान्तिमवाक्यस्य पूर्वोक्त एवार्थो विवक्षित । यतो हि लक्ष्मीसहस्रनामावल्या नीतेरपि निर्देशोऽस्ति । "धर्मो नारायणः स्वयम् ।" इति तु प्रसिद्धमेव । अत्र नीति-धर्म-रूपयोर् लक्ष्मीनारायणयोरेकत्र शय्याया प्रतिष्ठापन प्रयोजनमुक्तमवतारस्य । तस्य तात्पर्यमिदमेव, यत् वैदिक-विधि-बोधितानि लौकिक-पारलौकिकोभयविध-श्रेय.साधनानि

कर्माणि प्रमाणत्रयेणादौ तथात्वेन निश्चित्य लोकसेवा-दृष्टया कर्तव्य-बुद्धया चानुष्ठातव्यानीति । इ तादृश-कर्तव्य-भावनया ज्ञान-सुरक्षादि-कार्य-कर्तृणा सग्रह समादरश्च शासनसस्थया प्रथम कर्तव्य, तद्-दर्शनेन लोकेष्वपि तादृश-गुण-सपादने प्रवृत्ति स्यादिति । गुणातिशयवता सग्रहस्य सुलभो मार्गो भारतीय-राजनीतौ निर्दिष्ट ।

गुणिलाभार्थम् एव चातुर्वर्ण्य-व्यवस्था ।

ज्ञान-सुरक्षा-वाणिज्य-शिल्पादि-विशिष्ट-कार्यार्थं विभिन्नाना गुणिना सग्रह आवश्यक, एकस्य सर्व-कार्य-करणे सामर्थ्यादिति पाश्चात्यनीत्याऽपि स्वीक्रियते । तत्रैकैक-श्रेणीस्थाना स्व-स्व-कार्ये श्रेष्ठ-गुण-सपादने सल्लग्नाना कृतेऽन्यश्रेणीस्थाना कार्यकरणेऽवसर एव नाव-शिष्यते । अतस्तत्र विभिन्न-कार्यानुसारेण विभिन्न-श्रेणी-विभागो न्याय्य एव । तादृश-श्रेणीषु यदि जन्मनैव तत्तदुपयुक्ता सस्कारा उपलभ्यन्ते, तर्हि तद्बाधके कर्मणि शासन-सस्थया कदापि न प्रवर्तितव्य देशहित-दृष्टया । तदुक्त भारविना —

" प्रकृति खलु सा महीयस सहते नान्यसमुन्नति यया । " इति ।

अस्याभिप्रायस्तु — स्वभावसिद्धस्यैव कर्मण सफलता निश्चितेति । अत एव सेना-गुण-निरूपण-प्रसङ्ग कामन्दकेनाप्युक्तम् —

" अद्वैध्य क्षत्रियप्रायो दण्डो दण्डविदा मत " इति ।

अत्र क्षत्रिय-प्राय-शब्दस्याशय टीकायामेव वर्णित — **" क्षत्रियाणा युद्धयोग्यत्वाद् इतरेषा तत्सपर्काद् उत्साहो भवति "** इति । किच प्रकृति-सिद्ध-शोभन-सस्कारवत् स्वेवापत्कालेऽपि स्थिरताया सभव इति तु प्रागुक्तमेव । एतादृश-गुणि-लाभार्थमेव भारतीय-राजनीतौ चातुर्वर्ण्य-व्यवस्था विशेषतो वर्णिता ।

अस्या एव व्यवस्थाया परिणामो यद् अद्यापि भारतीयेषु जन्म-प्रभृत्येव तादृश-सस्कारा दृश्यन्ते । इतिहासत इदमपि ज्ञायते, यद् रामार्जुनादि-वीराणा स्वभावत एव —

"आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ।"

—इत्यादीनि वचनान्यामन् । एव सेनापति-पद-स्थितेन परशुरामेण महामन्त्रिपदे स्थितेन चाणक्येन च कदापि ज्ञानादि-रूप स्वकर्तव्य न विस्मृतम् । सपूर्णस्याधिकारस्य सत्वेऽपि स्वय पर्णकुटी-सेवन न परित्यक्त ताभ्यामिति च ।

चन्द्रगुप्त-मन्त्रिणश्चाणक्यस्यापि जीवन दृश्यताम् । सपूर्णस्य नन्दराज्यस्य स्वायत्तीकरणानन्तर तद्वश्यायैव गुणातिशयवते चन्द्रगुप्ताय राज्य प्रदत्त तेन । किच नन्दामात्यस्य राक्षसस्य प्रज्ञा-भक्ति-पराक्रमादीन् गुणान् सल्लक्ष्यामात्यपदे तमेव नियुज्य स्वय ज्ञानरूपाया राष्ट्रसेवाया कृते सर्वस्व-त्याग-पूर्वक वने पर्णकुटी-सेवनमेव कृतम् । तत्र चार्थशास्त्र पविश्ववन्द्यम् अमूल्य ग्रन्थरत्न निर्माय तद्वारा यथार्थ-नीति-प्रकाशने भ्रान्ति-तिमिर दूरीकृत जगत । कुलीनतया परपरागत-सस्कारस्यैवेद फलम् । अन्यथैतादृश-त्यागस्य कथमन्यत मभव ? अत्यन्तम् अर्वाचीन इतिहास समर्थ-रामदासस्य वर्तते । सोऽपि शिवाजी-महोदयस्य राजोपयुक्त-गुणान् परीक्ष्य तमेव राज्ये अभिषेचयामास । अनन्तर स्वय निस्पृहो ज्ञानसेवायाम् एव तत्पर आसीत् । तत्-तपस्या-फल-रूपो बोधबोध-ग्रन्थोऽद्यापि मानव-समाजाय ज्ञानरूप प्रकाश वितरतीति ।

एवमेव परपरागत-सस्कारानुप्राणितेन वैश्यवर्गेणापि देशान्तरे भ्रमण विधाय राष्ट्रेऽपेक्षिताना सर्वेषा वस्तूना सचय कृत । पशु-सरक्षणद्वारा देशे दधि-दुग्धादि-सपन्नतापि सपादिता । तथापि तस्य लाभाश शास्त्रनियन्त्रित एवासीत् । तद्वारा सचितस्यापि धनस्य विनियोगो निस्वार्थ-भावेन राष्ट्रहितार्थमेव कृतस्तेन । अत्र विषये राणाप्रताप-कालीनाना भामाशाह-प्रभृतीना नामोल्लेख कर्तु शक्य ।

एव तादृश-सस्कार-युक्तेन शूद्र-वर्गेणापि शिल्पादि-कला-द्वारा भारतवर्षस्य शोभा सवर्धिता, यस्या अवशेष दृष्ट्वाऽद्यापि विश्यमेवात्यन्त चकित भवति । एतद्-वर्गीय-कृषि-कौशलेनैव च भारते सर्वदाऽन्नसौकर्यम् आसीत् ।

अत्रायमेव विशेषो यत्—तत्-तच्छ्रेणीस्थै स्वस्वकर्माणि त्याग-श्रम-कष्ट-सहिष्णुतादीनाम् आवश्यकताया सत्यामपि न कदापि क्लेशोऽ-

नुभूत किंतु तत्रोत्साह सतोषश्चैवानुभूतौ । अत एव तादृशातीतकालस्य स्मरणमद्यापि स्वर्णयुग-रूपेण क्रियते लोकै । तदानीतनै राजभिरपि जन्मसिद्ध-सस्कारवत्सु जनेषु गुण-सवर्धने प्रतिबन्धकाना विलासित्वादि-दुर्गुणाना प्रवेशो यथा न स्यात् तथा प्रयत्यते स्म । एतादृशमूलसस्कारा-नुसारेण इदानीमपि तादृश-व्यवस्थाया सपादन न दुष्करम् ।

एतादृशी सुव्यवस्था पाश्चात्य-नीतौ दुर्लभैव । तत्र तु राष्ट्रहितो-पयोगिषु मुख्यतमेषु कार्येष्वपि सर्वेषा यथेच्छ व्यवहारेऽनिर्बन्धो वर्तते । अत एव समयानुसारेणोत्पद्यमानैर्नूतनै सस्कारैर्लोकाना परपरागत-प्राचीनसस्कारास्त्वभिभूयन्ते, अस्थिरतया तेषामपि प्राबल्य न भवतीति वस्तुस्थिति । तस्य परिणामोऽयमेव, यत् विषम-प्रसङ्गे तेषा निष्फलता, शमदमोत्साहादि-गुणहीनता च । अत एतादृशानिश्चित-फलक-पाश्चात्य-नीत्यनुसरणेन लोके सुख शान्त्यादि-निर्माण तु कालत्रयेऽप्यसभवि।

उत्पथगामिनी पाश्चात्य-राजनीतिः ।

पाश्चात्यराजनीतिरेव भारतीयानामुत्पथ-गमने हेतु । यतो हि यस्या लोक-हित-साधनत्व भारतीय-राजनीति-शास्त्रे वर्णित सहजतो गुणोत्कर्ष-मपादिकायास्तस्या जाति-व्यवस्थाया समूलोन्मूलनेनैवेदानी सर्वत्र विलासितादि-दुर्गुणाना प्राधान्य सवृत्तम् । परपरागताया लोक-सेवाभावनाया अपि मूलोच्छेदो जात । ग्रामेषु सदा देवतावत् पूजनीयै-रतिथिभिरधुना सर्वत्राधचन्द्र प्राप्यते यादृश-मार्गानुसरणेन मोरध्वजस्य राज्ञो गृहे यौर्यनिमित्तमागतैश्चोरैरपि राज्ञा साधूनामिव कृत सत्कार प्राप्य स्वयमपि साधुना प्राप्ताऽऽसीत् तादृशो मार्ग एव साम्प्रत प्रतिरुद्धो वर्तते । शास्त्र-पराङ्मुखतया केवलबुद्धिवादपुरस्करणेन च स्वाभिमान-शू-न्यायां जनतायाम् उच्चनीचभावकल्पनाया प्रवेशेन सर्वत्र नैतिकपतनो-न्मुखता दरीदृश्यते । मानापमान-शङ्काया अवसरदानमेव तावन्नोत्कर्ष-विधायक भारतीय-राजनीति-सम्मत वा ।

समानन तु प्रत्येकमावश्यकम् । पर तदेव किमनुरोधेन केन कस्य क्रियते ? इति सम्यग्विचार्यमाणे भारतीयराजनीतेर्यथार्थं स्वरूप ज्ञायेत ।

वस्तुतो लोकसेवाया लोकहितस्य च भावना यस्या व्यक्ते श्रेण्या वा हृदये जागर्ति, तस्या मनसि मान-समानकल्पनापि नायातीति सिद्धान्त । गुणिभि' क्रियमाणाया लोकसेवाया कृते तेषा समानो राष्ट्रेणैव क्रियते । एतादृश-लोकसेवाया शिक्षणार्थमेव भारतीय-राजनीतावाश्रम-व्यवस्था विहिता । तत्र शूद्रजाते स्वय सेवापरायणतया तद्विषये न किमपि वक्तव्यम् अवशिष्यते । त्रैवर्णिकेभ्यस्तूपनयनसस्कारेण सहैव प्रथम सेवाया शिक्षा दीयते । तेषा ज्ञानप्राप्तिरपि गुरुशुश्रूषा-द्वारैव भवति । गुरुणापि विद्यार्थिषु विनय दृष्ट्वैव विद्या दीयते । एव रीत्या ब्रह्मचर्याश्रम एव सपादित सेवासस्कारोऽग्रे अपि राष्ट्रहितसाधको भवति । कि च शिक्षणकाल एव वास्तविक-सुख-प्राप्त्युपायास्तेभ्य प्रदर्श्यन्ते । येन तेषा जीवने कदापि क्षुद्राया स्वार्थपरायणताया विषयलोलुपतायाश्च ससर्गो न भवेदिति । तत्राध्यात्मिकताया परिचयोऽपि विशेषत सहायको भवति । स एव च जीवनस्य अन्तिम-समये तान वैराग्य-युक्तान् ईश्वरभक्तांश्च विधाय परम-शान्तिमये आनन्द-सागरे निमज्जयति । भारतीयराजनीतेर्लक्ष्यभूताया शान्तेश्चरमसीमा एतावत्-पर्यन्त वर्तते । एतादृश-शान्ति प्रत्यव सर्वेषामाकर्षण पूर्वम् आसीत् ।

* *

आश्रम-व्यवस्था लोकसेवा-शिक्षणार्थम् एव ।

* *

वर्णाश्रमिभि क्रियमाणाया लोकसेवाया कृते प्रत्युपकाररूपेण तेषा समानो राष्ट्रेण यदि क्रियेत तर्हि स केषुचिच्छिरशूल कुतो जनयतीति न ज्ञायते । राष्ट्रसेविना समानन तु राष्ट्रेण क्रियमाण मनोविज्ञानदृष्टचा स्वाभाविकमेव । यतो हि प्रेमपूर्वक ये खलु राष्ट्रसेवाकार्ये मग्ना भवन्ति, तेषु राष्ट्रस्य विश्वासश्चित्ततोषश्चावश्यम्भाविनौ । अतस्तेषाम् आदरो मित्रत्व-भावनया राष्ट्रेण क्रियेतैव । एतादृशो दास्य-सख्ययो कायकारण-भाव-नियम पूर्वं स्थिरसधि-विचारावसरे उक्त एव ।

अथोक्तनियममनुसृत्य विभिन्न-श्रेणीस्थै क्रियमाणा राष्ट्र-सेवा कीदृशी ? तत्समाननमपि राष्ट्रेण कथ क्रियते ? इत्यय विचार प्रस्तूयते ।

तत्रानुवंशिकगुणोत्कर्षसहितेन शूद्रवर्गेण या राष्ट्रसेवा क्रियते, तदर्थं सपूर्णंस्यायस्य साधनभूत शिल्पकलादि-क्षेत्रमेव तस्मै पुरस्कार-रूपेण स्वतन्त्रतया राष्ट्रेण प्रदत्त वर्तते। किं च अन्यवर्गीयाणा विवाहादि-प्रसगेषु तस्मै यत्नपूवक साहाय्य-प्रदानस्य भावना अद्यापि दृश्यते। एतादृश शूद्राणा समान दृष्ट्वा तमसहमानै कैश्चिदसूयया यदि शूद्रेषु राष्ट्रविषये विपरीत-भावना उत्पाद्यत नहि ते कथ दयनीयाना शूद्राणा हितैषिणो भवितुमर्हन्तीति विवेकिन एवावधारयन्तु।

एवमेव राष्ट्रेऽपेक्षिताना वस्तूना विदेशतो विनिमयादिना सग्रहो वैश्यानामानुवंशिक कार्यम्। तद्द्वारा, तत्र तत्रान्नसत्र-धर्मशाला-विद्यालय-देवमन्दिर-तडाग-चिकित्सालयादीना देशोपयोगिना निर्मापणेन च राष्ट्रसेवा एतद्वर्गेण क्रियते। तस्या कृते राष्ट्रेणापि पितृतुल्यतया सम्मा-ननम् अस्य क्रियते। एतदेवानुमोद्यते धर्मशास्त्रेणापि। यथा—

"अन्नदाता भयत्राता यश्च विद्या प्रयच्छति।
जनिता चोपनेता च पञ्चैते पितर स्मृता॥"—इति।

अन्तःकलहः पाश्चात्य-कूटनीति-परिणामः

राष्ट्रस्वभावानुरोधेन जायमान वैश्यान्ना समान दृष्ट्वा यदि केषाचन मनस्यन्तर्दाहो भवेत, तन्न च तैर्यदि भेदनीतिद्वारा राष्ट्रेऽन्त-कलहो निर्मीयेत, तर्ह्यय पाश्चात्यकूटनीते परिणाम एव इत्यतोऽन्यत्किमु वक्तव्यम्?

एव क्षत्रिय-वर्गोऽपि स्वीयानुवंशिक-गुणोत्कषद्वारा राष्ट्र-रक्षार्थं स्वप्राणदानेऽपि सदा सन्नद्धस्तिष्ठति। तस्यैव जागरणेन सपूर्णं राष्ट्र सुखेन स्वपिति। अत एतादृशामूल्यसेवाया पुरस्काररूपेण राष्ट्र कोश-समर्पणपूर्वक तस्मै राजसिंहासन प्रदाय स्वयमानन्दमनुभवति। तद् दृष्ट्वा यदि कैश्चिदसूयया तद्विरुद्ध प्रचार क्रियेत, तर्ह्यय राष्ट्रद्रोह एवेत्यवश्य वक्तव्यमापतति।

ब्राह्मणवर्गस्यापि सेवाकार्यं कीदृशम् इति दृश्यताम्। स खलु

THE KUPPUSWAMY SASTRI.
RESEARCH INSTITUTE.
ROAD, MADRAS-4.

विषमतम - प्रसङ्गेष्वपि सात्त्विकताया अपरित्यागपूर्वक विद्यासागरे संपूर्णतया स्वय निमज्ज्य सप्राप्त ज्ञानरत्न जनतायै समर्पयति । एतादृशी अमूल्या राष्ट्रसेवाऽनेन अर्थप्राप्तिसाधनभूता अन्याः सर्वा वृत्तीः परित्यज्याप्यविच्छिन्नरूपेण सतत प्रचाल्यते । अतस्तत्पुरस्कारपूर्वक केवल विनयेन तन्नमस्कारपूर्वक तस्योपदेशो राष्ट्रेण शिरसा धार्यते—

' शिष्यस्तेऽहं शाधि मा त्वा प्रपन्नम् । "

इत्येतादृशवचनद्वारा स्वस्य विनीतता प्रकाश्यते च ।

* *

सेवा-श्रेणी-सापेक्ष संमाननम् ।

* *

एव रीत्या राष्ट्रसेवका यतो राष्ट्रेणैव चित्ततोषत समानिता भवन्ति, न तु तद्-याच्ञानुसारेण, ततस्तत्रोच्चनीच-भावनाया उत्पाद प्रचारश्च क्रियमाण केवल हास्यास्पदमेव भवितुमर्हति । यया श्रेण्या राष्ट्रस्य यादृशी सेवा क्रियते, तादृशमेव समानन तया प्राप्यते । अत्र उदाहरणमिदमेव यत्—

"शरीरे बलाधानार्थं हि जनैराहारो भुज्यते । प्रथम सर्वोऽप्याहार उदर गच्छति । तत सत्त्वशीलैरिन्द्रियै स्वकार्यानुसारेण तदीय सत्त्वाश एवाकृष्यते । एवमेवान्यैरप्यवयवै स्वस्वकार्यानुरोधेन अवशिष्टभागाकर्षणपूर्वक पोषण प्राप्यते । तत्र यथेन्द्रियादीना न कोऽप्यपराध, न वा तेषु कस्यापि महत्त्व ह्रीयते, तथैव राष्ट्रस्यापि-स्थितिर्ज्ञेया । राष्ट्रमप्येक शरीर तदन्तर्गता सर्वा श्रेणयस्तदवयवा अत (?) सर्वासा पृथक् प्रयोजनमावश्यकत्व च वर्तते । तत्र यथा शिरस कर्तव्ये पादस्य तत्कर्तव्ये वा शिरस आक्रमणे निष्फल भवति, तथैव भारतीय-राजनीत्युपयुक्त-गुणोत्कर्ष-मूलिकासु पूर्वोक्त-श्रेणीष्वपि इति, तत्र कश्चनाक्षेपो विक्षेप एव स्यात् ।

एतादृश्या निर्दुष्टायाश्चातुर्वर्ण्य-व्यवस्थाया उपरि साप्रत या समन्तत आपत्तिरापतिता, तस्या मूल-कारण तु अस्माकमेवाव्यवस्था । यतो हि पूर्वोक्त-लोकसेवा-भावना परित्यज्य अद्यत्वे यस्य मनसि यदेवा-

याति तत्कार्यंकरणे सर्वेषां प्रवृत्ति समुत्पन्ना । नवीन-कार्याणा सस्कारस्तु तेषु नास्ति । अतस्तत्र साफल्य न लभ्यते । सकटावस्थाया प्राप्तायां अधीरा सन्त स्वकीयमुत्तरदायित्वमन्यस्योपरि पातयितु सर्वे प्रवृत्ता भवन्ति । राष्ट्रसेवाकरणे असामर्थ्येऽपि समानापेक्षा तु एषु प्रत्यहं वर्धत एव ।

अत एवेयमापत्तिरायाति । पर तत्र पूर्वोक्तरीत्या गुणोत्कर्षार्थम् उक्तव्यवस्था-विधायिकाया भारतीयराजनीतेर्न कोऽपि दोषोऽस्ति ।

पाश्चात्त्यनीतिस्तु सर्वनाश-हेतुः ।

भारतीयराजनीतेरय सिद्धान्तोऽवश्यमवगन्तव्यो यद् अत्र यदि भारतीयराजनीत्यनुसारेण शासनव्यवस्था न सचाल्येत, लोकैश्च परपरागतो गुणोत्कर्षसाधको मार्गो नावलम्ब्येत तर्हि राष्ट्रे कस्यापि नियमस्य असत्त्वे सुचारुरूपेण न कापि व्यवस्था प्रचलिष्यति । तद्विपरीता पाश्चात्त्यनीतिस्तु सर्वथा विफला सती अन्ते सर्वनाशहेतुर्भविष्यतीति । तदुक्त सक्षेपत कामन्दकेन —

"स्वर्गनिन्दाय धर्मोऽय सर्वेषां वर्णलिङ्गिनाम् ।
अस्याभावे तु लोकोऽय सकरान्नाशमाप्नुयात् ॥" इति ।

अथ भारतीयराजनीतेश्चतुर्थं वैशिष्ट्य यस्माद्राज्यस्य प्राणभूतादैदिकेतरनीत्यन्तरेष्वदृश्यमानात् सत्त्वगुणाद् भवति पूर्वसूचितस्य तस्य विषये किंचिन्निरूप्यते ।

शासनकार्येष्वेतादृश-सत्त्व-गुणस्य अभिवृद्धयर्थम् एव भारतीयराजनीतौ शब्दप्रमाणस्यापि समन्वय इष्ट । राजशासनसस्था वा न स्वतन्त्र वस्तु किन्तु राज्यस्याङ्गमेव । तस्य कार्यम् इदमेव यद् गुणिना सग्रहपूर्वक राज्ययन्त्र-सचालनम् । यथा पादादि-मस्तकान्तावयव-समुदायस्य शरीरसज्ञा भवति तथा स्वस्वगुणसपन्नस्वाम्यादिसप्ताङ्गसमुदायस्यैव राज्यमिति सज्ञा वर्तते । तदुक्त कामन्दकेन —

क्रियासिद्धिः सत्त्वे नोपकरणे ।

" स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोषो बल सुहृत् ।
एतावदुच्यते राज्य सत्त्वबुद्धिव्यपाश्रयम् ॥ " इति ।

अस्यार्थो जयमङ्गलायामेव वर्णित " राज्य राजेत्यभिधान-प्रत्ययो प्रवृत्तिनिमित्त तच्च स्वस्वसपदुपेत प्रकृतिसप्तकमेव भवितु-महंति " इति । सत्त्व बुद्धिश्चेति द्वयमेव सर्वेषु राज्या ङ्गेष्वेकसूत्रता-निर्माण पुर सर सर्वेषा सरक्षणे हेतुरिति ' सत्त्व-बुद्धि-व्यपाश्रयम् ' इत्यस्य तात्पर्यम् ।

अत एवोक्तम् –" **क्रियासिद्धि सत्त्वे वसति महता नोपकरणे ।** "– इति सत्त्वस्य महिमा नल-राम-युधिष्ठिरादिभि स्वचरित्रद्वारा प्रका-शित । यद्यपि सत्त्वस्य चर्चा पूर्वनिर्वाचनपद्धतिनिरूपणावसरे सक्षेपतः कृता, तथापीदानी विशेषतस्तन्निरूपणमारभ्यते ।

आचार्याभिनवगुप्तपादै प्रत्यभिज्ञा-दर्शन-ग्रन्थे सत्त्वस्य निरूपणमेव कृतमस्ति —

" स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञान क्रिया च सा ।
माया तृतीये ते एव पशो सत्त्व रजस्तम· ॥ " इति ।

स्वातन्त्र्यमेव कर्तृत्वम् ।

अस्यार्थ. भगवत सर्वविषयक-ज्ञान-क्रिया माया-शक्तय एव क्रमेण तदशभूते जीवे सत्त्वरजस्तमोगुणरूपा भवन्तीति । अय भाव तादृश-ज्ञानरूप-सत्त्वाशेनैव कर्तृत्वसपन्नो जीव कस्मिन्नपि कार्ये आफलसिद्धि प्रयत्न विधाय विश्रान्ति लभते इति । ईश्वरनिष्ठ पूर्ण कर्तृत्वमेवाशतो जीवेऽभिव्यक्त भवति । तद्बलात् स. स्वकार्ये एवान्यान् सर्वानावर्जयितु सदा प्रयतते न त्वन्याधीनता, वाञ्छति । अस्य ज्ञानेच्छा-क्रियाशक्ताना लाभोऽपि तत एव । कर्तृत्व च स्वातन्त्र्यमेव । अत एव " **स्वतन्त्रः कर्ता** " इति सूत्रे पाणिनिनाऽनयो पर्यायत्व निर्दिष्टम् । स्वातन्त्र्य च " **स्वेतर-सकलकारकाप्रयोज्यत्वे सति इतरकारकचक्र-प्रयोक्तृत्वम्** " इति निबन्ध-

कारैव्यख्यातम् । ईश्वरोऽपि ज्ञानेच्छाकृतीना समष्टिरूपत्वेनोपादान-गोचरापरोक्षज्ञान-चिकीर्षाकृतिमत्त्वरूपात् तादृश-कर्तृत्वादभिन्न एव । शक्ति-शक्तिमतोरभेदात् । पत्युर्ज्ञानमिति च राहो शिर इतिवत् कल्पितभेदेन व्यवहारात् । अत्रेद विचारणीय यत् परिश्रमेण श्रान्तो जीवो यदा विश्रान्तिलाभार्थं स्वपिति तदा तदज्ञानावस्थायामपि भुक्तस्यान्नस्य पाचन, तन्निर्मितानामचेतनाना रसरक्तादीना शरीरे औचित्येन सचारश्च केन कार्यते ? इति । निद्रामग्नस्य जीवस्य निष्क्रियतया तदधीन तत्कार्यं न भवितुमर्हति । अतोऽवश्य वक्तव्यम् आयाति, यत् केनापि जागरूकेण कर्तृत्वशक्तिमता चेतनेन तत्कार्यं सचाल्यते इति । स एव साक्षी स्वतन्त्र परमेश्वर । अयमेव सिद्धान्तो भागवतेऽपि प्रतिपादित ।

"योऽन्त प्रविश्य मम वाचमिमा प्रसुप्ताम्
सञ्जीवयत्यखिल-शक्तिधर स्वधाम्ना ।
अन्याश्च हस्त-चरण-श्रवण-त्वगादीन्
प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥" इति

'स्वातन्त्र्यमेव चैतन्य, पारतन्त्र्यमेव जडता' इति आधुनिकानाम् अपि समतम् । अतः पर्यायान्तरेण तैरपि चेतन परमेश्वरोऽङ्गीक्रियत एव ।

एतावता सक्षेपेणेश्वरस्यास्तित्व समाध्य तादृशेश्वरजीवयोर् अन्योन्यसबन्धविषये किंचिदुच्यते, येनेश्वरीय-ज्ञानशक्तेरेव प्रतिबिम्ब-रूपता जीवावस्थाया सत्त्वगुणस्येति साधु ज्ञायेत ।

यस्माज्जीवस्य निद्रावस्थाया परमेश्वर एव जागरूक सन् शरीर-पोषणादि-कार्यं करोतीति सिद्धयति, तत एव जागृदवस्थायामपि सर्वेषु तत्कार्येषु परमात्मन कर्तृत्वमभिव्यज्यते इति सिद्ध भवति ।

किं च निद्रात उत्थानानन्तर 'सुखमहमस्वाप्स न किंचिद् अवेदिषम्" इति स्मरण, "योऽहमस्वाप्स स एवेदानी तत्स्मरामि।" इति प्रत्यभिज्ञा चेतिद्वय सर्वानुभवसिद्धम् । अतो जीवोऽपि तादृश-परमेश्वर एव नान्य इत्यपि सुव्यक्त सिद्धयति । अनुभव-स्मरणयो सामानाधिकरण्य-नियमात् ।

एकोऽपि सूर्यो यथाऽनेकेषु दर्पणेषु प्रतिबिम्बित सन्ननेकवद् भासते तद्वदेव सर्वशक्तिमान् परमेश्वर एकोऽपि मायावशाद् उपाधिभेदेन जीव-

कर्तृत्वं विना ज्ञानव्यवहारः निरर्थकः ।

रूपेण नानात्व भजते । तस्य कारण तु " एकोऽह बहु स्या प्रजायेय । " इत्याकारिका तस्येच्छैव । वेदान्त-साहित्यादि-दर्शन-समत सिद्धान्तोऽय यथार्थ एव न तु कल्पनामात्रम । दर्पणस्थानापन्नाया मायाया एवाविद्येत्यपर नाम । स्वीय-विक्षेप-शक्त्या एकस्यानेकवद्भासनात् सा अविद्येत्युच्यते सैव च सर्वशक्तिमत, सर्वज्ञस्य परमानन्दघनस्यापि भगवतो जीवावस्थाया न केवलमल्पशक्तिमत्त्वम् अल्पज्ञत्वम् अल्पानन्दवत्त्व वा सपादयति किंतु मूर्खराट्त्वमपि । अत एव च वस्तुत सर्वकर्तृत्वसपन्न स्वतन्त्रोऽपि जीव कार्यकाले आत्मानम् असमर्थं मन्यते । परन्तु यथा यथा अभ्यासेन सत्सङ्गेन वाऽज्ञान यावन्मात्रयाऽस्य नश्यति, तथा तथा कस्मिन्नपि कार्ये कर्तृत्वक्षमताया अत्र प्रादुर्भावेण " इदमह जानामि । " इति व्यवहारोऽनेन क्रियते । कर्तृत्वशक्ते प्रादुर्भावम् अन्तरा केवलज्ञानव्यवहारस्तु निरर्थक एव । अत एवोक्तम् —

" यः क्रियावान् स " पण्डित " इति ।

यस्मिन् पुरुषे कस्यचित् कार्यस्य विषये सपूर्ण ज्ञान, तत्साफल्यसपादनेच्छा, तदर्थमुद्योगश्चेति त्रितय वर्तते, स एव तत्र समर्थ इत्युच्यते एव तादृशसामर्थ्यवशात् कार्यस्य सफलताया सत्या तज्जन्यानन्दानुभवोऽपि तस्य निश्चित एव । जीवस्य पुरतोऽसकृदानन्दस्यावसर आयाति, किंतु स स्थिरो न भवतीत्यत्र कारण तु स्वनिष्ठ-कर्तृत्वविषयेऽस्य विश्वासाभाव एव । जीवापेक्षया ईश्वरस्य वैशिष्ट्यमिदमेव, यत्-सर्वज्ञस्य तस्य सकल्पमात्रेण कर्तृत्वबलात् कार्यस्य सफलता निश्चिता । अत एव चानन्दस्यावश्यभावात् स परमानन्दघन इत्युच्यते ।

अत्राय विशेष यत्-ईश्वरस्य सकल्पक्रिययोर्न भेदो भवति, तयोर् युगपद्भावित्वात् । अत एवाभिनवगुप्तपादै — " पत्युर्ज्ञान क्रिया च या । " इत्यत्र सकल्पस्य पृथगुपादान न कृतम् । एव रीत्या ईश्वरीयानन्दप्रभामिश्रितज्ञानप्रभाया एव जीवे सत्त्वरूपता, एवमानन्दप्रभामिश्रिताया: सकल्पाभिन्नक्रियाया रजोगुण-रूपता, पूर्वोक्तायास्तदीयमायाशक्तेरेव च तमोगुणरूपता भवति, तदुक्त भावप्रकाशनेऽपि —

"परस्मादात्मनो भान्ति ज्ञानानन्दक्रियाप्रभाः ।
ज्ञानप्रभा च सानन्दा तस्या सत्त्व प्रजायते ।"

इत्यादिना । जीवस्य सकल्पमात्र सफल भवत्येवेति न निश्चय । अत एव कार्यवैफल्ये सति स दु खपङ्के निमज्जतीति तु सर्वविदितमेव । किन्तु यदि जीवेन स्वसकल्पे ईश्वरीय-सकल्पानुसारित्व सपाद्येत, तर्ह्यवश्य तस्य कार्ये न कदापि विफलता दु खप्रसङ्गो वा भवेत् । प्रत्युत सर्वत्र सफलताप्राप्त्याऽनेनानन्द एवानुभूयेत । अधिक चैतत्-सत्त्वम् अधिकृत्य चातुर्वर्ण्यप्रकाशे स्फुटीकृतम् ।

* *

सत्त्वम् एव राजनीतिप्राणरूपम् ।

* *

पूर्वोक्तरीत्या जीवेच्छारूपत्व प्राप्ताया ईश्वरेच्छाया अपि वस्तु-तस्तदीयज्ञानान्न भिन्नता, तस्यैवाग्रिमावस्था-रूपत्वात । अत एव तादृशेच्छायामप्यानन्दप्रभामिश्रित-ज्ञान-प्रभाया अस्तित्व स्वभावसिद्धमेव । एव तादृशेश्वरेच्छानुसारिण्या क्रियायाम् अप्यानन्दप्रभामिश्रणेनावश्य-भाव्यम् । अत ईश्वरोक्तायां नीतिरूपक्रियायामेव ज्ञानानन्दप्रभयो सत्त्वेन तादृश-नीत्यनुसारेण वर्तनमेव सत्त्वस्य समाश्रयण भवति । एव च तादृशनीते सम्यग्ज्ञानमेव बुद्धिपद-व्यपदेश्यम् । राज्याङ्गेष्वेतादृशसत्त्वबुद्धयोर्योगे सति राष्ट्रे सर्वत्र सुव्यवस्था निश्चितैवेति सत्त्वमेव राजनीते प्राणरूपम् इत्यवश्य वक्तव्यमायाति ।

मनुष्यमात्रेण स्वेच्छा ईश्वरेच्छानुसारिण्य कर्तव्या इति यदुक्त तेन स्वेच्छाना प्रतिरोधात्तत्रारत-त्र्यमेव स्वीकृत न स्वातन्त्र्यमिति भ्रमस्तु न कार्य । यतो हि प्रायश सर्वेषा प्राणिनामिच्छा धर्मार्थकामरूपत्रिवर्गविषयिण्य एव भवन्ति । तत्सिद्ध्यर्थमेभिरनेके उपाया यद्यपि कल्पयितु शक्यास्तथाप्येते तत्र सफलताया अलाभे दु.खभाजो भविष्यन्तीति तादृशेच्छाना वैफल्य-निराकरण-पूर्वक निश्चित-फलकत्व-सपादनार्थमेवेश्वरेच्छाया अनुसरण कृत भारतीय-राजनीत्या ।

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE,
MADRAS-4

प्रत्यक्षत शास्त्रानुसारेण च सर्वेषु प्राणिष्वीश्वरस्यास्तित्व पूर्वं प्रतिपादितम् । अधुना तदिच्छाया ज्ञान कथ भवेदिति किञ्चिद्विमृश्यते ।

ईश्वरेच्छाया सकलजगद्धितसाधनाना च निश्चयो वेदादेव भवितुम् अर्हति । अस्याय सर्वाधिको विशेष ,—यदत्र क्वापि पूर्वापरविरोध अहित-सभावनाप्रसगो वा नोपलभ्यते । मायाविष्टेन मानवेन केवल स्वबुद्धिबलेन यद्यत्सशोध्येत, तत्र सर्वत्रास्यालपज्ञतावशान्न्यूनता सभाव्येतैव । एकत्रावधानेऽन्यत्र दुर्लक्ष्यताऽस्य भवतीति तज्जन्या हानिरपरिहार्यैव ।

अत्र विषये उदाहरणमिदमेव, यत् साम्प्रत सर्वत्र प्रचलितेन विद्युद्दीपेन यद्यपि प्रकाश-लाभस्तथापि तेन साकमनपेक्षिता नेत्रज्योतिषो हानिरपि सभाव्यते । एवमेवाधुनिकसशोधितया शल्य-चिकित्साप्रणाल्या स्वास्थ्यलाभ इव तस्या दुष्परिणामोऽपि दृश्यते । केवल लक्षणानुसारेण क्रियमाणयाऽनया चिकित्सया व्याधिस्तु शीघ्र प्रतिरुध्यते, पर तस्या एव भविष्यतो नूतनव्याधेर्निरोधो न कर्तुं शक्य इति ।

सत्त्व-गुण-रहितं राष्ट्र विनाशोन्मुख भवेत् ।

वेदमूलिकायाम् आयुर्वेदचिकित्साया त्वेतादृशो दोष कदापि न सभवति, तस्या निदानानुसारेण प्रवर्तमानत्वात् । अत एव परपरागनायाम् आयुर्वेदचिकित्साया तदुक्तायाम् औषध-प्रक्रियाया तदुक्तेषु रोगलक्षणेषु रोगनिदानेषु वा नाद्यावधि कोऽपि विशेषज्ञो दोषम् उद्भावयितु समर्थोऽभूत् । किन्तु प्रकारान्तरेण तदुक्तानाम् एवाङ्गीकार सर्वैरपि क्रियते ।

यादृश-वेदमूलकत्वेनायुर्वेदस्यैतादृश माहात्म्य, तस्मिन्नेव वेदज्ञानां मानवानां कल्याणार्थं सत्त्व-शील-सदाचारादीनाम् आवश्यकत्वस्य निर्देश समुपलभ्यते । ईश्वरानुग्रह एव च वैदिकविधि-वाक्यतोऽवगम्यते । अतस्तस्यानादरो विशेषज्ञै कथ क्रियेत ?

वेदोक्तस्येश्वरानुग्रहस्याप्युपेक्षाया फलन्त्विदम् एव निश्चित, यत् — राज्यचक्रस्य स्थिरता-सपादकेनात एव प्राणभूतेन सत्त्वगुणेन रहित सद् राष्ट्र विनाशोन्मुखमेव भवेदिति । ईदृश रहस्य जानद्भिश्चाणक्यादिभि

ाय राजनीतौ वेदोक्त एव मार्गो व्यवस्थापित । वेदाना
य तु तेषा निर्दोषतया एव सिद्धम । तस्य प्रामाण्य-चिह्नत्वात ।
नदुष्टेन चक्षुषा यद् गृह्यते, तस्य धूर्तवाक्यतोऽन्यथात्वशङ्का मूर्खता
यिकेति तस्य सत्यत्वमेव निश्चेयमाय राजनु ास्यादि वर्यभि-
ददोषरहितत्वे पा ाप्य स्वीक्रियते, तथैव लौकिक-शब्दाना वदिक-
ा व। वक्तुर्भ्रमप्रमादविप्रलिप्साकरणापाटवरूप-दोष चतुष्टय-रा हि-
धृताना प्रामाण्यम् अङ्गीकार्यमेव, वैदिकशब्दराशिस्तु भ्रमादिदोष-
रयुक्त एव, यदाज्ञानुसारेण सूर्यादियोऽपि चलन्ति समस्तेषु पाञ्च-
कनत्त्वेषु यस्यैव सत्ता प्रचलति, यश्च नि स्वार्थस्तादृशेनेश्वरेण
वात्तस्य । अत एव भगवता श्रीकृष्णेनापि श स्त्रमर्यादापालनम् एव
ल्याणस्य मार्ग, अनेनैव च दैवीसपत्तेर्मूलभूत सत्त्व प्राप्तु शक्यम्
नम ।

नदुक्त गीतायाम् —

"य शास्त्रविधिमुत्सृज्य वर्तते कामकारत. ।
न स सिद्धिमवाप्नोति न सुख न परा गतिम् ॥
तस्माच्छास्त्र प्रमाण ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्र-विधानोक्त कर्म कर्तुमिहार्हसि ॥" इति ।

मच्छिरोमणिना ज्ञानेश्वरेणापि वेदविषये एवमेवोक्तम् ।

"जो जगीं सम समान सकृपु । हिताहित दाखविता बापु ।
तो अमान्य केला बापु । वेदु जेणें ॥" (१३-९६)-इति ।

राष्ट्रे मूलभूत-सत्त्वगुणाभिवृद्धयर्थमेव भारतीयराजनीतौ प्रत्यक्षा-
रोरिव वेदरूपशब्दप्रमाणस्यापि समन्वय इष्ट । इदमेव भार-
जनीतेश्चतुर्थं वैशिष्ट्य, यच्च न वैदिकनीतेरन्यासु राजनीतिषु
असभव । एतावता प्रपञ्चेन भारतीय-राजनीते सर्वाङ्गपूर्णता-
राष्ट्रेषु स्थिर-सधि-स्थापनाया सूत्र, शासने मौष्ठव-सपादिका
न-पद्धति, गुणोत्कर्ष-विधायको मार्ग, राज्यस्य प्राणभूत सत्त्वम्
या चतुर्णां निरूपण कृतम् । अथ प्रजासु स्वोग्रप्रभुशक्ते स्थिरता-
र्थं साम-दान-भेद-दण्डरूपेषु चतुर्षूपायेषु कस्यावलम्बन विशेषत
-सस्थया कर्तव्यम् इति विचार प्रस्तूयते ।

सद्व्यवहार-शासनस्य वृत्तिः —'वसुधैव कुटुम्बकम्।'

विचारोऽयं भारतीयराजनीतौ निर्दुष्टरीत्या कृतो वर्तते। अस्मिन्नपि विषये पाश्चात्यराजनीते-र्यूनताऽग्रे व्यक्तीभविष्यति। येन च भारतीय-राजनीते पञ्चम वैशिष्ट्य सर्वेषा हृद्गत भवेत्।

सद्व्यवहारस्य तत्सफलतायाश्चाभिलाषो यदि राज्ञ शासकस्य वा स्यात्तर्हि तनावश्य सर्वेषा हृदि स्थितेन परमेश्वरेण सहाभिन्नेन भाव्यमिति पूर्वमेवोक्तम। तादृशव्यक्ते स्वभाव एवाय भवति, येन दयालुतावशात्कम्मा अपि दण्डदाने सहसा प्रवृत्तिस्तस्या व्यक्तेर्न भवति। किं च सा व्यक्ति "वसुधैव कुटुम्बकम्" इति भावनावशात् पुत्रवद्वात्सल्यदृष्ट्या सर्वान् पश्यति। त एवैतद्वशव्यक्तिविषये कविकुलगुरो कालिदासस्योक्तिरियम् —

"प्रजाना विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासा केवल जन्महेतव ॥" इति।

एतादृशव्यक्त्या कदापि दण्डव्यापारणमेव न क्रियत इति तु न, किंतु यदा दण्डमन्तरा अन्येन केनाप्युपायेन कार्यसिद्धिर्न भविष्यतीति ज्ञायते तदैवाल्परूपेणानिकृष्टेनैव दण्डप्रयोगः क्रियते, सोऽयमनापराधिन पुनरपराधकरण प्रवृत्तिर्मा भवतु, तस्य च प्रायश्चित्त भवत्विति बुद्ध्यैव क्रियते। अत प्रायश्चित्तरूपेण प्रयुक्त एतादृशः दण्ड कदापि जन-विक्षोभ-कारण न भवति, प्रत्युत जनतायाम् अनुरागमेव वर्धयति। अत्रोदाहरणमिदमेव यदत्यन्त दुष्टाना दानवाना वधरूपः प्रायश्चित्ते देवैः कृते तेषा सद्गतिप्राप्तिः। अत एव देवस्तादृशप्रयोगस्य यशसा कृता —

"एभिर्हतैर्जगदुपैतु सुख तवैते
कुर्वन्तु नाम नरकाय चिराय पापम्।
सञ्जातमृत्युमधिगम्य दिव प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ! ॥" इति।

वीरेण सदा सर्वत्र विवेकशक्तिः समाश्रियते ।

एतादृशो दयालुरेव साहित्यशास्त्रानुसारेण 'वीर' इत्युच्यते । वीरेण सदा सर्वत्र विवेकशक्तेरेवोपयोगः क्रियते इत्ययमर्थो वक्ष्यमाणवचनस्य तात्पर्यविधारणेन स्पष्टमवगम्येत । तदुक्तं बालरामायणे —

"क्षुद्राः सत्रासमेते विजहति हरयः क्षुण्णशक्रेभकुम्भा ।
युष्मद्देहेषु लज्जा विदधत इह मे सायका निष्पतन्तु ॥
सौमित्रे ! तिष्ठ पात्रं त्वमसि न हि रुषा, नन्वहं मेघनादः ।
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि" ॥ इति ।

अत्राल्पप्राणेषु वानरेषु दयालुतयैव वीरो मेघनादो बाणान् प्रक्षेप्तुं नाभिलषति । एवं विवेकेनैव लक्ष्मणमपि न क्रोधपात्रता नयति ।

दयाहीनः पुरुषस्तु 'रौद्र'-प्रज्ञाभाक्-क्रोध-परवशतया कमनर्थं न कुर्यात् ?

अत एव पितुःस्मरणेन क्षुब्धस्य रौद्रम्याश्वत्थाम्नोऽविवेकमूर्विका उक्तिर्वेणीसंहारनाटके एव वर्णिता —

' कृतमनुमत दृष्ट वा यैरिद गुरुपातक
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिनाम्
अयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥" इति ।

अनेन वचनेन स्पष्टमवगम्यते यत् स निर्दुष्टस्यापि हत्यां वाञ्छतीति ।
अत एतादृशस्य विवेकशून्या वार्तापि कस्यचित् प्रिया न भवितुमर्हति ।
अयं भावः — रौद्रप्रकृतिको मनुष्यः कर्तव्यबुद्धिं परित्यज्य स्वेच्छाचारस्यैवाधीनतां गच्छति । यदि तन्मनोरथविपरीतं कार्यं केनापि क्रियेत, तर्हि क्रोधोऽस्मिन्नवश्यं प्रादुर्भवति । तेन च तर्कशक्तेर्मतिभावस्य च नाशो निश्चित एव । अतोऽश्वत्थाम्न इव कुनीतौ प्रवृत्तिस्तस्यावश्यम्भाविनीति लोकविश्वासस्तत्र कथं स्थिरो भवेत् ? अनेन राज्यसंघटनं तु दूरे आस्ताम्, तद्विघटनमपि प्रतिरोद्धुं न शक्यते । अतो रौद्रप्रकृतिकः शासकः प्रजासु सामाद्युपायानां यथावद्विनियोक्ता कदापि न भवितुमर्हतीति ।

यथावत् सामादिप्रयोगेनैव वीरः सुयशोभाग् भवति

येन च स्वेच्छाचारनिरपेक्षं नीतिरूपकर्तव्यानुसरणं क्रियते तादृशो वीरस्तु सामादीना यथावत्प्रयोगेनैव सुयशोभाग्भवति । तस्य कार्येषु यावन्मात्रा यथाभाग-इव-समन्विता स्यात तावन्मात्रया सुयशो निश्चितमेव, न कश्चन दोषोऽपायति । अत एवैतादृशमत्कर्मविषये गीतायाम् उक्तम्

"नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते" इति ।

अनयैव दिशा मीमासकैर्नित्यकर्मविषयेऽपि **'आख्यानानाम् अशक्तौ शक्ति. सहकारिणी-"** इति न्यायेन यथाशक्ति तत्करणसमर्थिः प्रदत्ता । तेषामयमभिप्राय यत् कर्तव्यरूपेण प्राप्तेषु नित्यकर्मसु यथाशक्ति सपादितानि साधनान्येव पर्याप्तानि, शक्तिमतिक्रम्य सर्वाङ्गोपसहारस्य न आवश्यकता तत्र, न तत्र तदुद्देश्यभूता ईश्वरसेवा तत्प्रसन्नता वा, न कश्चन स्वार्थ इति ।

"पत्र पुष्प फल तोय यो मे भक्त्या प्रयच्छति ।"— इत्यस्यापि यमेवाशय । काम्यकर्मणि तु यथाशक्तिन्यायो न प्रवर्तते, तत्र कामना एव प्राधान्याद् ईश्वरसेवा । गौणत्वाच्च ।

एतावता रौद्रवीरयोर्विशेष स्पष्टीकृत, वीरप्रकृतिकेनाल्पेनैव साधनेन सपादित किञ्चिदपि कार्य सफलमेव भवति । किन्तु स्वेच्छाचारेण कार्यसिद्धि काङ्क्षमाणस्य रौद्रस्य कस्मिंश्चित् कार्ये कदाचित् साफल्ये लब्धेऽपि तेन प्रत्येकस्मिन् कार्ये सफलता प्राप्येतैवेति न विश्वासं कर्तुं शक्यम् ।

रौद्रमनोवृत्तिद्वारा काम्यचिदनुष्ठान न भारतीय-राजनीति-सम्मतम् अत्र विषये कामन्दकेनैवम् उक्तम्

"अवश्यमायान्ति वश विपश्चिताम् उपायसदृशबलेन सपद ।
भवत्युदार विधिवत्प्रयोजिते फल हि राज्ञा क्वचिदर्थसिद्धये ॥" इति

अस्य श्लोकस्य जयमङ्गलाटीका एव वर्तते—**"उपाय एव सदृशस्तेनाकृष्यमाणत्वात् । तद्बलेन तत्सामर्थ्येन । उदार महत्फलमिति सबन्ध । विधिवत्प्रयोजिते उपाये क्वचिद् अर्थसिद्धय इति संबन्ध ।"**—इति ।

अस्य साराशस्तु—केवलसिद्धयुद्देशेन क्रियमाण सामाद्युपायप्रयोगः प्रथम योग्य एव न भवति । कदाचिद् युक्तत्वेऽपि तस्य फलसिद्धिरल्पैव भवति, किन्तु कर्तव्यदृष्ट्या विवेकपूर्वक वीरेणाल्पाशेनापि क्रियमाणात् तस्मादर्थसिद्धिर्निश्चितेति । "**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।**" इति श्रीकृष्णोक्तेरप्ययमेवाशय., यत्—मनुष्येण कर्तव्यमात्रे वीरोचिता वृत्तिरङ्गीकार्या न तु रौद्रवृत्ति । कर्तव्य-परतायां फलम् आनुषङ्गिक भवत्येव । तत्तु लक्ष्यत्वेन न विवक्षणीयम् । अकार्ये प्रवृत्तिरपि नोचितेति ।

◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆

उत्तम-प्रकृतिर्वीर उत्साहात्मा विभाव्यते ।

◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆ ◆

साहित्यशास्त्रे वीर-रौद्रयो स्वरूपस्य स्वभावस्य च यद् वर्णनमुपलभ्यते, तद्दर्शनेनेद स्पष्टमवगम्यते, यत्—पाश्चात्यराजनीतेर्लोकेषु वीरवृत्तिनिर्माण न लक्ष्यमिति । एतादृशी तस्या न्यूनता अग्रिम-विवेचनेन व्यक्तीभविष्यति । वीरप्रकृतिक-मनुष्य-विषये भावप्रकाशने एवमुक्तम् "**उत्तमप्रकृतिर्वीर उत्साहात्मा विभाव्यते ।**"—इति । स खलु उत्साही सत्त्वसपन्नतया नीतिविरुद्धाचरणाभाववान् धर्मप्रधानबुद्धिमाश्च भवति, इदमेवोत्तमत्त्व तस्य । अर्थकामोद्देशेन स कदापि न प्रवर्तते । पर तदीय-व्यवहारेणैव जनताया आकर्षणवशाद् अर्थादय स्वयमेव सिध्यन्ति । यथा सिंह स्वतन्त्रमनोवृत्तिर्दक्ष उत्साही चेति पशूना राजा भवति, तथैव स्वतन्त्रो विवेकी दक्ष उत्साही च पुरुष सर्वेषा चित्तस्यावर्जनपुरस्सरं राज्ञो मन्त्रिणो वा पद प्राप्नोति । अत एव कामन्दकेनाप्युक्तम् —

"शुश्रूषा श्रवण चैव ग्रहण धारण तथा ।
ऊहाऽपोहोऽर्थविज्ञान तत्त्वज्ञान च धी-गुणाः ।"

"दाक्ष्य शौर्य तथाऽमर्षः शौर्यं चोत्साहलक्षणम् ।
गुणैरेतैरुपेत सन् राजा भवितुमर्हति ॥"—इति ।

—अत्र च उत्साहे विशेषतो निर्भरस्तु तेन हि मनुष्यो मोहविषाद-विस्मयैरसस्पृष्टो भवतीति । उत्साहिना पुरुषेण ससारेऽस्मिन् स्वस्याऽसाध्य किमपि कार्यं न दृश्यते । स्वसकल्पितात् कार्यात् तत्पूर्त्यनन्तरमेव

स निवर्तते । अत एव तस्य पुरतो विस्मय-प्रसङ्ग कदापि नायाति । सत्त्वप्राचुर्येणेश्वरेच्छानुसारिण्या प्रवृत्त्या च नीत्यनुष्ठाने प्रमादो मोहो वा तस्मिन् न घटते । कर्तव्यबुद्धया प्रेरितत्त्वाद् विघ्नै विहन्यमानोऽपि विषाद न लभते । एतादृशस्य पुरुषस्य मित्रतासपादनार्थं गुणिनः कुलीनाश्च पुरुषा स्वयमेव प्रयतन्ते । प्रभुशक्तेर्मन्त्रशक्तेस्तन्मूलभूतस्य विनयस्य नीतेश्च समाश्रयणेन राजलक्ष्म्या अपि अस्य कण्ठे जयमाला प्रदीयते ।

अत एव भावप्रकाशनेऽप्युक्तम्—

"उत्साह सत्त्वसपत्तिशौर्यत्यागाविसभव ।
अविस्मयादसमोहादविषादित्वतोऽपि च ॥
पुरुषार्थविशेषेषु कार्यतत्त्वार्थनिश्चय ।
पराक्रम प्रतापश्च दुर्धर्षप्रौढसैन्यता ॥
यश कीर्तिश्च विनयो नयश्च प्रभुशक्तिता ।
मन्त्रशक्तिश्च सपन्नधनाभिजनमित्रता ॥
इत्यादयो विभावा स्युर्वीरस्य परिकल्पिता ।"—इति ।

अत्र मन्त्रशक्तेर्यश कीर्त्योश्च विशेषोऽवश्य ज्ञातव्य । मन्त्रशक्तेरुपयोगो वीरेण सामादि-प्रयोग-प्रसङ्गे क्रियते । अत एव जयमङ्गलायाम्—

षाड्गुण्योपयोगी विचारो मन्त्रः ।

"षाड्गुण्योपयोगी विचारो मन्त्र ।"—इत्युक्तम् ।

" धार्मिकत्व-प्रयुक्तोत्कृष्टत्व-प्रकारक-नानादिग्देशीय-लोकज्ञान-विषयता "—रूपा कीर्तिस्तु कुल-परपरागत-व्यवहारेण सपाद्या । अस्या उदाहरणम्—

" रघुकुलरीति सदा चलि आई ।
प्राण जाइ पर, वचन न जाई ॥ "

—इति तुलसीदासोक्तौ द्रष्टव्यम् । केवल-स्वकीय-व्यापारेण जनिता पूर्वोक्तविषयतैव यश पदेनोच्यते । अत एव स्वपरीक्षार्थमुपस्थित सिंह प्रति

राज्ञो दिलीपस्य " यश शरीरे भव मे दयालु । " इति धेनो कृते स्वदेह-समर्पणेन गो-सेवा-जन्य-यश शरीर-प्रार्थना । यद्यपि यश कीर्त्यो कार्य-साफल्यानन्तरमेवोत्पत्तिस्तथापि तत्प्राप्तिर्यथा यथा भवेत्तथा तथा उत्साहो वर्धत इति तद्विभावत्वेन तयो परिगणन कृतम ।

सत्त्वसपन्नस्य वीरस्यानभावाश्च तत्रैवोक्ता —

" स्थैर्य-शौर्य-प्रतापैश्च धैर्यराक्षेप-भाषितै ।
सामादीनाम् उपायाना यथाकालप्रयोगत ॥
भाषितैर्भविगम्भीरैरनुभावा भवन्ति ते । " इति ।

वीरनिष्ठ-शान्ति-प्रभावः सर्वत्र प्रसरति ।

सत्त्वप्रधानतावशात् समस्तकार्येषु समप्रयाग एव विशेषतोऽस्य निर्भरो भवति । एतादृश-वीरस्य मत्ता-रूढताया शासनकार्ये विशेषतो माधुर्यमायाति । जनतायामप्युग्रवृत्तिनिरोधपूर्वक कर्तव्यभावना जागर्ति । यतो हि वीरनिष्ठाया शान्ते प्रभाव ममन्तत प्रसृतो भवति अत एव भारविणा किरातार्जुनीये एतादृश-शासकस्य चित्रणमेव कृतमस्ति ।

" न तेन सज्ज क्वचिदुद्यत धनु कृत न वा कोपविजिह्ममानन्म ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥" इति ।

भारतीयराजनीत्यापि सामप्रयोगायैव मुख्य स्थान दीयते । तदुक्त कामन्दकेन —

" साम्नाऽर्थसिद्धये विद्वान् यतेत यतमानस ।
सामसिद्धिं प्रशसन्ति सर्वतश्च विपश्चित ॥ "
" क्षीरोदो मथित साम्ना फलायामरदानवै ।
निजघ्निरे धातराष्ट्रा सामप्रद्वेषिणोऽचिरात् । " इति ॥

सामलक्षण च —

" वाग् अनुद्वेग-जननी सामेति परिकीर्त्यते । " इति ।

अयमर्थ — यथा ग्रीष्मसतप्तेन मनुष्येण क्वचिच्छीतलता-व्यवस्था-लाभे शान्तिर्लभ्यते, तथैव यादृगवचनेन व्यवहारेण वा सर्वं शीतलता

अनुभूयेत तादृश वचन व्यवहारो वा सामपदार्थं इति । एतादृशसान्त्व-युक्त पुरुष सर्वैरभिलष्यते, तस्माद् दूरस्थितिर्न कस्यापि समता भवति । तत्कारण तु जनताया दुःखेनाय स्वयमपि दुःखितस्तन्निवारणे सदा प्रयतते, तत्र न कदाप्युपेक्षा करोति इति । एतादृशपुरुषस्य लोकप्रिय-ताविषये वाल्मीकिनैवमुक्तम् —

* *

युक्तनेतुः कार्याय सर्वेषा प्राणार्पण-सिद्धता ।

* *

"यश्च राम न पश्येत्तु य च रामो न पश्यति ।
निन्दित स भवेल्लोके स्वात्माप्येन विगर्हति ॥" इति ।

वस्तुतो नेतृत्वस्य स्वरूपमिदमेव , एतादृशनेतृत्वेनैव शरीरे यथा विभिन्नानामङ्गानाम् एकप्राणता दृश्यते, तथैव राज्याङ्गेषु सर्वेषु साम-रस्यमुत्पद्यते । अत एवैतादृशनेतु कार्यायं राष्ट्रान्तर्गता प्रत्येक व्यक्ति प्राणसमर्पणेऽपि सन्नद्धा भवति । तदुक्तं भारविणा दुर्योधनवर्णन-प्रसङ्गे किरातार्जुनीये —

"महौजसो मानधना धनार्चिता धनुर्भृत सयति लब्धकीर्तय ।
न सहतास्तस्य न भिन्नवृत्तय. प्रियाणि वाञ्छन्त्यसुभि. समीहितुम् ॥ इति ।

सामप्रयोगश्च पञ्चविध उक्त कामन्दकेन । स यथा —

"परस्परोपकाराणा दर्शनं गुणकीर्तनम् ।
सबन्धस्य समाख्यानमायते सप्रदर्शनम् ॥
वाचा पेशलया साधु तवाहमिति चार्पणम् ।
इति सामप्रभेदज्ञैः साम पञ्चविध स्मृतम् ॥" इति ।

अत्र प्रत्येक पृथक्प्रयोजनक वर्तते ।

१) पूर्वकृतानामुपकाराणा सदर्शनेनान्योन्य शत्रुताया भय निवर्तते ।

२) यस्मिन् ये गुणा सन्ति तेषा यथासमय प्रकटनेन गुण-ग्राहकताया परिचयो भवतीतीर्ष्यया अवसरालाभेन मित्रता स्थिरी-भवति ।

३) विवाहादि-प्रसङ्गेषु सबन्धिना स्मरणेन प्रेमतन्तुरविच्छिन्नो भवति । इत्यादि ।

४) तथा व्यवहार कर्तव्य, येनान्योन्यमैक्या एव लाभोऽग्रे भविष्यति इति सदा ज्ञायेत ।

५) मनोवाक्कायकर्मभिस्तवाहमित्यभिप्रायप्रकटनम् । इति च चतुर्थपञ्चमयोर्निर्वचनम । अनेनैव प्रकारेण शरणागत विभीषण भगवान् रामचन्द्र प्रतिजग्राह किल । एतादृशसामोपेक्षाया फलम् इदम् एव, यत् स्वराष्ट्रस्य दुरवस्थावशात् स्वकीयेष्वेव शत्रोर्भेदनीति-प्रचारस्यावसरलाभ । ईदृशाद् दुष्परिणामादात्मन सरक्षणार्थमपि विशेषत साम्न आवश्यकता वतते । तदुक्त कामन्दकेन —

" क्व च नरपतिवर्ग सग्रह क्व प्रजाना
मधुरवचनयोगाल्लोकमभ्याददीत ।
मधुरवचन-पाशैरायतालोनित सन्
पदमपि हि न लोक सस्थितेर्भेदमेति ॥ " इति ।

अस्य श्लोकस्य जयमङ्गला च —

" मधुरवचनयोगादिति, सूनृतया वाचा युक्तादित्यर्थं, सद्वृत्तादिति शेष । अत्र सद्वृत्तादिति वक्तव्ये मधुरवचनग्रहण प्रजासङ्ग्रहोपायेषु सूनृता वाणी प्रधानमिति दर्शनार्थम् । पाशा इव पाशा मधुरवचनपाशैराग्रतालोनित अत्यर्थं सबद्ध । पद स्तोक न सस्थितेर्भेदमेति राज्ञि कृतावस्थाना परैर्न भिद्यन्ते इत्यर्थ " — इति ।

मनोनिग्रह-समर्थः एव सामप्रयोगे सफलः ।

एतावता सत्त्वप्रधानस्य सामप्रयोगद्वारा लोकसग्राहकस्य च नेतृत्वस्य परिचयो दत्त । अयात्रविषये वर्तमाना पाश्चात्यराजनीते न्यूनता उपस्थाप्यते । विषयेऽस्मिन यावती दृष्टिरपेक्षिता तावती पाश्चात्यनीतौ दत्तेति न दृश्यते । यतो हि—मनोनिग्रहसमर्थ एव सामप्रयोगेऽपि सफल भवति । अन्यथा दुर्योधनस्येव केवलसत्त्वाभिनयेन तात्कालिक-फललाभे अपि तत्परिणामो विपरीत एव भवति । अत एव तत्र सज्जनतायाः

आवश्यकत्वमुक्तम् । पर सज्जनता न परलोकविश्वासम् अन्तरा स्थिरता लभते, इति सिद्धान्त । पाश्चात्यनीतौ तु तस्यैव मूलच्छेद दृश्यते, अतस्तत्र सत्त्वस्य स्थानमेव नास्तीति सत्त्वयुक्तस्य । वीरस्य नेतृत्व तत्रा सभवीत्यवश्य वक्तव्यमापतति । केवलरौद्रप्रकृतिकाना नेतृत्व पुरस्कृत्य सा कियत्कालपर्यन्त स्थास्यतीति न वक्तु शक्यम् । स्थिरस्य सामप्रयोगस्याभावेन च तत्र कदाचिदपि जनक्षोभनिवृत्तेराशा गगनकुसुमायितैव । अत पाश्चात्यनीतेरिय न्यूनता अविवेकप्रयुक्ताऽत्यन्त हृदयद्राविका वर्तते ।

• •

दानेन द्विषन्तो मित्राणि भवन्ति ।

• •

सामप्रयोगविचारानन्तरमिदानी दानविषये भारतीय-राजनीत सिद्धान्त उच्यते । व्यवहारे शास्त्रे च उभयत्र स्व-स्वत्व-निवृत्तिपूर्वकपर-स्वत्वापादनमेव दान-शब्दार्थ । यथा यावत्तडागे जल तिष्ठति, तावदेव तत्र विहङ्गमादीना वसतिर्भवति, यावच्च गौर्दुग्ध ददाति तावद्वत्सोऽपि तत्समीपे तिष्ठति, एवमेव यावच्छासनमस्तया कल्पवृक्षवल्लोकाना मनोरथ पूर्यते, तावदेव तदाज्ञा लोकै पाल्यते तत्सेवापि क्रियते च । तदुक्त कामन्दकेन—"**जनो दातरि रज्यते**"—इति । अत एव—

"**दानेन द्विषन्तो मित्राणि भवन्ति**"— इति श्रुतिरपि यथार्था भवति । दानरताया एव शासनसम्थाया विषये जनताया सदा देवत्व-बुद्धिर्जागृता तिष्ठति । ये खलु प्रियवक्तारो दानशीलाश्च ते देवतावद् वन्द्या भवन्ति । तदुक्त कामन्दकेन —

"**ये प्रियाणि च भाषन्ते प्रयच्छन्ति च सत्कृतम् ।**
श्रीमन्तो वन्द्यचरणा देवास्ते नरविग्रहा ॥" इति

साम्न इव दानस्यापि पञ्च भेदा नीतिसारे उक्ता । यथा —

"**य सप्राप्तधनोत्सर्ग-उत्तमाधममध्यम ।**
प्रतिदान तथा तस्य गृहीतस्यानुमोदनम् ॥

ईश्वरप्रीत्यर्थं दानस्यैव भारतीय-नीतौ व्यवस्था ।

द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्तनम् ।
देयस्य प्रतिमोक्षश्च दान पञ्चविध स्मृतम् ॥ "

—इति । एतेषां सदृष्टान्त निर्वचनम् इदमेव, यत्—

१) यथा श्रीकृष्णेन सत्राजिताय तदीय स्यमन्तकमणि प्रतिदत्त, तथा यद्वस्तु यस्य वर्तते तस्मै गृहीतस्यापि तस्य पुन प्रतिदानम् ।

२) यथा सीताया स्थिति ज्ञात्वा प्रत्यागताना कीना मधुवने फलादिभक्षण सुग्रीवेणानुमोदितम्, तद्वद् यदि स्वकीयस्य वस्तुन उपयोग केनापि क्रियेत, तदा तदनुमोदनम् ।

३) बलिकर्णादिवद् ईश्वरप्रीत्यर्थं दानकरणम ।

४) यथा सेनापतिना सैनिकेभ्य शत्रुनगरे वस्तूना यथेच्छमपहरणे समतिर्दीयते, तथा अन्यस्य वस्तु यदि केनचिदपरेण स्वीक्रियेत तदा तद्विरोधम् अकृत्वा यथाशक्ति तत्-साहाय्य-करणम् ।

५) ऋणिन ऋणस्य प्रतिमोचन चेति ।

* *

देवतामन्दिरादिवृत्तिविलोपः शासनेन न कार्यः ।

* *

पूर्वोक्त-पञ्चविध-सामप्रयोगेन सहैतादृश-पञ्चविध-दानप्रयोगेऽपि क्रियमाणे राज्ये कदापि कलहस्य द्वेषस्य वा नावसर, प्रत्युत शान्तिपूर्वक सर्वेषामैक्यस्य मार्गो निष्कण्टको भवति । ईश्वरप्रीत्यर्थं क्रियमाणस्य दानस्यैव व्यवस्था भारतीय-राजनीतौ विशेषतो वर्णते । तत्र भूकम्पोऽतिवर्षण जलप्रलयो महामारिकेत्यादीनां प्रकृतिविक्षोभा न सम्भाव्यन्ते । एतादृश-प्राकृतिक-क्षोभात् संरक्षणायाऽऽचार्यनीतावद्यापि लोपलब्धो वर्तते । चरकादिग्रन्थेषु तन्निवारणोपायास्तत्कारणानि च विस्तरतो वर्णितानि । तन्निवारणार्थमेव वामन्दकेनापि देवतामन्दिरादीनां वृत्तिविलोप शासनसंस्थया न कार्य इति निर्दिष्टम् । तदुक्तम् —

" काले स्थाने च पात्रे च न हि वृत्तिं विलोपयेत् ।
एतद्वृत्तिविलोपेन राजा भवति गर्हित ॥ " इति ।

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE,
G H ROAD, MADRAS-4

इतिहासतोऽपि ज्ञायते, यद दानेन विग्रह-प्रशमन-प्रथा पूर्वत एव प्रचलिता वर्तत इति । पुरा किल वृषपर्वनाम्नो दानवेन्द्रस्य शुक्राचार्यस्य च परस्पर कस्मिंश्चिद् विषये विवाद सवृत्त । तच्छान्त्यर्थं राज्ञा शुक्राचार्यं प्रति यद्भवदभीष्ट तद् ददामीत्युक्ते "त्वत्कन्या मद्दुहितुर्देवयान्या सेवार्थं यदि दीयेत तर्हि त्वद्राज्ये वसतिर्मया क्रियेत नान्यथा" इति समय शुक्राचार्येण कृत । राजापि कन्या दत्त्वा विग्रह शमयामास । अतो राज्ञ ईदृश्या बुद्धिमत्ताया प्रशसा नीतिज्ञै क्रियते एव । एतद्विपरीत्येन पाण्डवेभ्यो ग्रामपञ्चकमप्यदत्त्वा विग्रहद्वारा सर्वेषा नाश कारितवतो दुर्योधनस्य तु निन्दैव तै क्रियते । तदुक्त कामन्दकेन —

"दारुण विग्रह विद्वान् दानेन प्रशम नयेत् ।
अपराधेन दुहितु. कुपिते भृगुनन्दने ॥
वृषपर्वा च दानेन दानवेन्द्रोऽभवत् सुखी ।
उपच्छन्द्यापि दातव्य बलिने शान्तिमिच्छता ॥
समूलमेव गान्धारिरप्रयच्छन् गत· क्षयम् ॥" —इति ।

अथ क्रमेण भेददण्डयोर्विचार प्रस्तूयते । तत्र व्यवहारे तावद्भेदशब्दोऽन्योन्यमैक्यस्य विच्छेदे रूढ । स एव च कलह-पद-वाच्य । विस्तृते शक्ति-शालिन्यपि राष्ट्रे शत्रुणाऽन्त प्रविश्य शनै शनैर्भद-नीति-प्रचारार्थं प्रयत्यत एव । तादृश्या शत्रोर्भेदनीतेरज्ञानेन परस्पर वैमनस्य कलहश्च प्रवर्तते राष्ट्र । तेन च जायमान शक्तेर्ह्रास शत्रोर्लाभदायक सञ्जन्ते तत्पारदृश्यतामानयति । भेदस्यास्य त्रैविध्यम् उक्त नीतिसारे—

"स्नेहरागापनयन सघर्षोत्पादन तथा ।
सतर्जन च भेदज्ञैर्भेदस्तु त्रिविध स्मृत ॥"

— इति । अत्र "शङ्काजनन निर्भर्त्सन च भेद ।"

— इति चाणक्येनास्य द्वैविध्यमेवोक्तम् इति आपाततोऽनयोर्मत-भेद इव यद्यपि दृश्यते, तथापि वस्तुतो विचार्यमाणे नयोर्मतैक्यमेव प्रतिभायात् । यतो हि — कामन्दकेन निर्दिष्टयो प्रथम-द्वितीययोर्भेदयो स्थाने चाणक्येन तत्कारणीभूतस्य शङ्का-जननस्य परिग्रह कृत, तत्कार्ययो पृथगुपादान न कृतमिति ।

शङ्काविषं राष्ट्रसुव्यवस्थाविनाशकत्वाद् भयकरम्

भेद-प्रयोगे शङ्का-जनन-मात्रेण स्नेह-रागयोर् अपनयन मानापमान-भावनाया प्रोत्साहन, स्पर्धाया उत्पाद सघर्षस्य बीजारोपणमित्येत्सर्वं सुशक भवति। अत शङ्कारूप विष तु राष्ट्रे सुव्यवस्थाया विनाशक-त्वादतिभयङ्करम्। इमा भेदनीतिम् एवाश्रित्य पाश्चात्यैरत्युन्नतायापि भारतवर्षाय रसातलमार्ग प्रदर्शितो वर्तते। अतिप्राचीनकालादारभ्य गुणोत्कर्षविधायकेन मार्गेण परस्परप्रेमपूर्वकम् उन्नते शिखर प्राप्तवति भारतवर्षेऽद्य सर्वत्र वैमनस्येन व्याप्तमित्यत्र कारण तु पाश्चात्यानाम् स्वीय-दुर्विचार-प्रचारद्वारा भारतीयाना हृदये सदेह-बीजारोपणमेव। स्थिरसधेर्मूलभूतस्य वेदशास्त्राद्यध्ययनस्यैव विषये तै पूर्वम् अनेन जीवन-यात्रा कथ निर्वहेत्? इत्यादय शङ्का उत्पादिता।

वेदाध्ययने जीवन-निर्वाह-शङ्का अनुचिता

अत्र यादृश-शङ्कया सर्वषा हृदयमाक्रान्त, सा निर्मूला कथ भवितु-महंतीति पर्यनुयोगस्य समाधान पूर्वोक्तविचारेषु सम्यगालोचितेषु स्वय-मेव भविष्यति। वैदिक-विधि-निषेधाना केवल पारलौकिकोत्कर्षसाधनमेव प्रयोजनमित्याधुनिकाना धारणैव प्रथमतो निर्मूला। यतो हि ऐहलौकि-कोत्कर्षेण सहैव पारलौकिकश्रेय सपादन तेषा मुख्य लक्ष्यम्। साम्प्रत यल्लौकिकोत्कर्षोद्देशेन क्रियमाणा सर्वेऽपि प्रयत्ना विफला भवन्ति, अथवा किञ्चिद्-सफलनाया प्राप्तावाम् अपि तत्र याऽशान्त्यादिमूलिका विघ्नपरम्पराऽऽयाति, तत्कारणन्त्वस्माक तदर्थं निश्चितफलकस्य वैदिक-मार्गस्योपेक्षैव। विश्वकल्याण-परायणषु वैदिक-मार्गानुयायिषु कदचनै-कोऽपि सेवकोऽन्न विना मृत इत्यत्र किमपि प्रमाणम् इतिहासेऽपि नोप-लब्धु शक्यम। अस्याम् अवस्थाया विधिप्राप्तस्य वेदाध्ययनस्य विषये जीवन-निर्वाह-शङ्का कथम् उचिता भवेदिति विवेकिन एव विचारयन्तु। भारतीये आदर्श-जीवने तु दृढ-विश्वास-पूर्वक कर्तव्य-तत्त्वावलम्बनेन जीवन-निर्वाह-चिन्तापि पाप-कुक्षौ प्रविष्टा वर्तते। तदुक्तम् —

THE KUPPUSWAMY SASTR
RESEARCH INSTITUTE

"का चिन्ता मम जीवने यदि हरिर्विश्वम्भरो गीयते ।
नो चेदर्भकजीवनाय जननी-स्तन्य कुतो निःसरेत् ?"

इति । एतादृशविश्वासस्योपयोगो न निष्क्रियतायां कर्तव्यः किन्तु लोकसेवा-भावनाया दृढतायाम् एव, यस्या परिणामोऽवश्य लोकानुराग-प्राप्ति ।

भारतीय-विचारधारायास्तर्कसङ्गतत्वेऽपि जनताया हृदयम् एतादृशशङ्कयाऽऽक्रान्त भवतीत्यत्र कारण तु सत्तर्कशक्ते प्रचाराभाव एव ।

येषु मनोदौर्बल्य स्यात्तेष्वेव शङ्कया स्थान लभ्यते । तदुक्त भावप्रकाशने —

"शङ्का सदेहरूपा स्यात् स्त्री-नीच-प्रकृति-श्रिता ॥" इति ।

शङ्काया प्रवेशे सति क्रमेण स्नेहस्य भक्तेश्च (रागस्य) ह्रासो भवति । अत्र स्नेहरागयोर्वैलक्षण्यमवश्यमत्रधेयम् । कस्यापि वस्तुन प्रथमदर्शनजन्यसुखानुभवेन या तत्सङ्गमनेच्छा सा स्नेह-पद-वाच्या, अस्या एव प्रौढताया सत्या रति-सज्ञा भवति । अनयैव च स्नेहस्य शोभा वर्धते । अस्या अवस्थाया परिचयस्तु यदा प्रेम-विषयस्य वियोगेन प्राणहानिसभावनापर्यन्त महत्कष्टमनुभूयेत तदैषा ज्ञेया । तदुक्त भावप्रकाशने —

"विदेशस्थे मृते वापि दुर्बले प्रतियोगिनि ।
धर्मिण क्लेशकारी य स प्रौढ स्नेह उच्यते ॥" इति ।

अस्याम् अवस्थायाम् अन्योन्य भयस्यानिष्टशङ्कायाश्चाभावेन निःशङ्कता भवति । तदुक्त तत्रैव — "भयशङ्कावसानात्मा स एव स्नेह उच्यते ।" इति । एतादृशस्नेहव्यापिन्यामवस्थायां रागो भवति । तदानी तु केवल सुखमेवानुभूयते न तु दुःखलेशोऽपि । अन्योन्य हृदययोरेकात्मतया शीतलतायां अनुभवति । ईदृशप्रेमावेशेन यदा ईश्वरोऽपि न मुच्यते, का वार्ता मनुष्यस्य ? तदुक्तम् —

"सुखदुःखात्मक भोग्य सुखत्वेनाभिमन्यते ।
येन राग. स इत्युक्तो रञ्जनाद्विषयात्मनो ॥" इति ।

प्रेमिणो परस्पर पार्थक्यस्यापि विस्मरण यदा भवति, तदाऽनुरागावस्था । तदुक्त— 'रागोऽनुवृत्तोऽविच्छिन्नोऽनुराग उदाहृत.' इति ।

अनुरागाविच्छेदार्थं शङ्का-शस्त्र-प्रयोगः ।

स्नेहरागानुरागाणा विषये उदाहरणम् इदमेव, यत् प्रत्येक जीवस्य स्वशरीरे यत्प्रेम तद्-वशात् म अहमेव शरीरमिति जानाति। किं च केनापि प्रकारेण शरीरात् स्वस्य भय शङ्का वा न भवति, प्रत्युत शरीरार्थं सर्व-प्रकारेण कष्टसहनेऽपि सुखमेवानुभूयतेऽनेनेति । इयमेव अनुरागमूला प्रेमिणोरवस्था । एतादृशानुरागविच्छेदार्थं शत्रुणा राष्ट्रे शङ्का-रूप शस्त्र प्रयुज्यते । जनताया हृदये कथमपि शङ्कया स्थान लब्ध चेत् शत्रो कार्यं सपन्न भवति । अत एवोक्तम्— जनताया आर्थिकसमृद्धौ सलग्नया शासनसस्थया सदा स्वविषये जनतायाम् अनुरागो यथा जागृयात् तथा प्रयतितव्यम् इति ।

" जितेन्द्रियत्व विनयस्य लक्षण, गुणप्रकर्षो विनयादवाप्यते ।
गुणाधिके पुसि जनोऽनुरज्यते जनानुराग-प्रभवा हि सपद ॥"

— अस्य श्लोकस्याप्ययमेव गूढाशय । अत्र प्रतिपादितस्य विनयशब्द-स्यार्थस्तु शास्त्रमर्यादानुसारेण नदुक्तानुष्ठानमिति ।

एतादृशविनयद्वारैव राष्ट्रस्यानुकूल्यसपादकत्व शासनसस्थाया सभवति, यतो हि लोकविश्वासस्यापीदमेव मूलकारणमिति । शासन-सस्थाया जनानुरागस्योत्तरोत्तराभिवृद्धौ सत्या शासनसस्थाप्रजयोरन्योन्य भयशङ्काराहित्येनैकात्मता सिध्यति । अस्याम् अवस्थाया राष्ट्रम् अत्यन्त समृद्ध भविष्यत्येवेत्यत्र नास्ति सशीतिलेशोऽपि ।

◆ ◆

उच्चनीचभाव-कल्पनया शासनपराभवः निश्चितः ।

◆ ◆

एकात्मतावस्थायामपि यदि शासनसस्थया जनताया तर्कशक्ते-र्दार्ढ्यसपादनेऽवहितया न भूयेत, नहि तत्र शङ्काविषसचारणे शत्रु सफलो भविष्यति । तस्य च परिणामोऽन्योन्यम् ईर्षोत्पाद कर्तव्य-मूलिकाया सेवाभावनाया क्षीणता च । उच्चनीच-भाव-कल्पनया च

परस्परम् अपमानकारका एव व्यवहारा सर्वत्र प्रचलिष्यन्ति राष्ट्रे । तेन चान्ते शासनसस्थाया पराभवो निश्चित एव ।

अथ निर्भर्त्सन-रूपस्य भेदनीतेर्द्वितीय-प्रकारस्य उपयोग शत्रुणा कथ क्रियते ? इत्युच्यते । पूर्वं शत्रुघ्नादिप्रलोभनद्वारा प्रजासु ये खलु लुब्धास्तान्वशीकृत्यानन्तरमन्यानपि भयप्रदर्शनपूर्वकम् अन्यपक्षतो विच्छेदयति । तदुक्तम् — "**क्रुद्धलुब्धभीतापमानिता परेषा कृत्याः ।**" इति ।

एव रीत्या भारतीय-राजनीतौ साधक-बाधकरूपेण सर्वं प्रतिपादितम् अस्ति, परम् अमु विषय दुर्लक्ष्यीकृत्य यदि वय शत्रुकृतायाभेदनीतेर्विषया भवामस्तर्ह्यत्रास्माकमेव दोषो नान्यस्य । अतो भारतीयराजनीतिविषयेऽपि नीतिज्ञाना दृष्टे आकर्षणम् आवश्यकम् ।

* *

नीतिकुशलैः यद् अनुमोद्यते स एव धर्मः ।

* *

अथाधुना दण्डनीतेर्विषये भारतीयराजनीतेर्वैशिष्ट्य निरूप्यते । एतत्तु पूर्वमेवोक्त यत् – प्रायश्चित्तरूपेण प्रयुज्यमानस्य दण्डस्य न लोकोद्वेग-जनकत्वम् इति । अस्य च दण्डस्य त्रैविध्यम् उक्त कामन्दकेन —

"**वधोऽर्थहरण चैव परिक्लेशस्तथैव च ।**
इति दण्डविभागज्ञैर्दण्डस्तु त्रिविधः स्मृत. ॥" इति ।

दण्डस्यावसरस्तदैवायाति, यदा कोऽपि स्वेच्छाचारेणान्यस्मै कष्टप्रदाने प्रवृत्तो भवेत् । तादृशे पुरुषे दण्डविधान तु शासनसस्थाया मुख्य कर्तव्यमेव । अन्यथा दुष्टानाम् एतादृशाचरणे उपेक्षाकारिणी शासनसस्था प्रजापालन-रूपात् स्वधर्मच्युता सती लोकेऽपि निन्दिता भवति । एतावत्तु सत्यमेव यद्दण्डविधानेन दुष्टस्य पीडाऽवश्य भवेदिति, परमन्यायमेव धर्म । अत एव भारतीय-राजनीतौ धर्मपदस्य व्याख्या "**नीतिकुशलैर्यदनुमोद्यते स एव धर्म ।**" इति कृता वर्तते । तदुक्त नीतिसारे —

"**यमार्या क्रियमाण हि शसन्त्यागमवेदिन ।**
स धर्मो य विगर्हन्ति तमधर्मं प्रचक्षते ॥" इति ।

इयं व्याख्या न केवल राजनीति-समता, अपि तु धर्मशास्त्र-समतापि ।

यदि कस्यचन घोरापराधिनो वधदण्ड एव नीतिज्ञ-समत, प्राजापत्यादि-प्रायश्चित्तद्वारा तस्य शुद्धिर्न तत्समता भवेत्, यदि चास्य दुष्टस्य वधेन सपूर्णस्य राष्ट्रस्य कल्याण भविता, तर्हि स दण्ड· शिष्ट-समतनया धर्मरूप एव। एवमेव जातिमर्यादाया उल्लङ्घयिता जात्या दण्डितो भवति, तादृशो दण्डो भारतीय-राजनीतेर्विशेषत समत इत्यस्य कारण तु पूर्वमेव विवेचितम्। यथा शरीरे कस्यचिदङ्गस्य दूषितत्वे तस्य च्छेदनमेवा-वश्यक तथैव सदाचार-हीनाया व्यक्तेर्दूरीकरणेन सामाजिक-सौष्ठवस्य रक्षा जात्या यदि क्रियेत तर्हि तद् युक्तमेव। सदाचारहीना व्यक्तिस्तु ससर्गेत सपूर्णमिव जाति दूषिता विधाय तदगुणोत्कर्षे बाधिका भवति। अत एव धर्मशास्त्रे पतितसमर्गोऽपि निषिद्ध ।

"ब्रह्महत्या सुरापान स्तेय गुरुङ्गनागमः।
महान्ति पातकान्याहुर्यश्च तै· सह सवसेत् ॥" इति ।

एतादृशाना पातकिना दण्ड शासनसस्थाया समाजस्य वाऽपेक्षया जात्यैव विधीयमान सुकरो भवति। आयुर्वेदेनापि पातकिभ्य औषधदान

* *

देशार्थ-समृद्धौ बाधकाना निग्रह आवश्यकः ।

* *

निषिध्यते। गृहे हिंस्रपशूना सर्पादीना वा वासो यथा हानिकरस्तथैव यदि पातकिना सबन्धो जातौ भवेत् तर्हि जात्या सह समाजस्य राष्ट्रस्य हानिर्निश्चिता। भगवान् श्रीकृष्णो ब्रह्मण्यदेव एवासीत्, पर तस्यापि, ब्राह्मणेनाश्वत्थाम्ना सुप्तानां पाण्डवपुत्राणा वधरूप निन्द्य कर्म यदा कृत तदा अर्जुनद्वारा तस्य दण्डविधानम् आवश्यक सवृत्तम्। अयम् इतिहास एतादृशप्रसङ्गे स्मर्तुं योग्य । एतादृशाना दण्डेन जनाताया क्षोभस्तु न भविष्यत्येव, प्रत्युत सा प्रसन्नैव भवेत्। वृश्चिकादीना वध सज्जनैरपि समर्थ्यते। अत एवोक्तम् —

"मोदेत साधुरपि वृश्चिक-सर्प-हत्यया ॥" इति ।

दुष्कर्मकर्तारो दण्डयोग्या एव, पर ये किल गोप्यतयाऽपराधा क्रियन्ते तेषा प्रकाशदण्ड शासनसस्थया कर्तुम् अशक्य। तादृशापराधानामुपेक्षापि

न युक्ता, यतस्तैं कण्टकरूपेण देशस्य हानि सतत क्रियेत । लोकमर्यादा-रक्षण-दृष्ट्या देशस्यार्थसमृद्धौ प्रमादो नोचित, अतस्तादृशमार्गे ये बाधका भवन्ति तेषा निग्रह आवश्यक इति कामन्दकस्य मतम । तदुक्तम् —

"धर्मसरक्षणपरो धर्मायार्थं विवर्धयन् ।
ये ये प्रजा प्रबाधेरस्तास्तान् शिष्यान्महीपति ॥" इति ।

अत एव तादृशेषूपाशुदण्डरूपेण विषादिप्रयोगो विहित । यतो हि — एतेषाम् अपराधस्य प्राकट्याभावात् प्रकाशदण्डो विधीयमानो जनक्षोभ-कारी स्यात् । एव रीत्या दण्डस्य द्वैविध्यम् —

"प्रकाशश्चाप्रकाशश्च द्विविधो वध उच्यते ।" इत्यनेनोक्तम् । उपर्युक्तविवेचनेनेद स्पष्ट भवति, यद्रौद्रप्रकृतिको मनुष्य एव प्रकाश-दण्डपात्र भवतीति । यत. तत आरभ्य प्रकाशरूपेणैव क्रियन्ते इति स

गुप्तापराधशालिनाम् उपांशु-दण्डयोग्यता ।

सर्वेषा द्वेषविषय एव भवति । लोकानाम् अपमानकरण, मिथ्याभाषण, हननप्रवृत्तिर्विद्यासदाचारादीना निन्दा, बलाद् अन्येषा सपत्तिहरणम् इत्या-दीनि तस्य स्वाभाविकानि कार्याणि भवन्ति । भावप्रकाशन तस्य स्वभावा एव वर्णिता —

"रौद्रस्तस्यानृत वाक्यमवज्ञा परुषोक्तय ।
वधान्यदारलाभादिप्रतिज्ञा राष्ट्रभञ्जनम् ॥
हठाद्ग्राहो गृहक्षेत्रदारादीना च मत्सर. ।
वेशजातिकुलाचारविद्याशौर्यादिनिन्दनम् ॥
आक्रोशकलहाक्षेपवाक्यालाभञ्जनादय ॥" इति

एतादृश-व्यवहारेण प्रतीकारे विफलो जनता न समर्था भवतीति तस्या एवैकत्र समवेता शक्ति. राजसस्थारूपेण तत्कार्यं करोति । एतद्विपरीतास्तु गुप्तापराधशालिन उपांशु-दण्ड-योग्या भवन्ति । प्राचीन-कालेऽपि शम्बूक-कालनेम्यादीना गुप्तापराधिना वर्णनम् उपलभ्यते । तैर् यद्यपि प्रकाशरूपेण अपराधा न कृतास्तथापि स्ववर्तव्य-रूप-देशसेवा-

विमुखतया नीतिदृष्टया ते गुप्तापराधिन एवासन् । अपराधिनश्च पञ्चोक्ता नीतिसारे —

" आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् ।
पृथिवीपतिलोभाच्च प्रजाना पञ्चधा भयम् ॥ " इति ।

अपराधिषु दण्डप्रयोगे करणीये यदि शासनसस्थयाऽसत्यस्याप्याश्रयण कर्तव्य भवेत्तर्हि तदपि धर्मसरक्षणदृष्ट्या उचितम् एव इति नीतिज्ञै स्वीक्रियते । अत एव गौतमेनाप्युक्तम् —

" तत्त्वाध्यवसायसरक्षणार्थं जल्पवितण्डे बीजप्ररोहण-सरक्षणार्थं कण्टकशाखावरणवत् । ताभ्या विगृह्य कथनम् । " इति ।

मदोन्मत्त-पराजयार्थं जल्प-वितण्डाश्रयः कर्तव्यः ।

अय भाव — मद-मानयो प्राबल्ये सति मनुष्यो यथार्थमपि वस्तु न जानाति । किं च मदयुक्ते पुरुषे वेदादीना गुरुजनाना सुहृदा च तिरस्कार स्वभावसिद्धो भवति । सदसद्विचारम् अपि कर्तुं न पार्यते तेन । यदि त सान्त्वयितु केनापि प्रयत्यते, तर्हि तस्मिन् मदस्याभिवृद्धिरेव भवति । न्याय्यमार्गात्स दूरे एव तिष्ठति । अतस्तस्य गर्वापहरण शासनसस्थायास्तत्त्वज्ञाना वा अवश्यकर्तव्य भवति । मदोन्मत्तस्य पराजयार्थम् एव वादिना जल्पवितण्डाश्रयण कर्तव्यम् इति गौतमेनोक्तम् । तेन तत्त्वसरक्षण भवेदिति । " न विगृह्य कथा कुर्यात् " इति छलाश्रयणनिषेधस्तु केवल तत्त्वनिर्णयप्रयुक्तायां वादपद्धत्यामेव प्रयज्यते । यतो हि — तत्र गर्वशून्यस्य सज्जनस्यैव प्रवर्तमानत्वान्न जल्पवितण्डाश्रयण-प्रसङ्ग । अनेनैव न्यायेन प्रजापालनोद्देशेन दुष्टनिग्रहार्थं यदि शासनसस्थयाऽसत्योपायावलम्बनम् अपि कर्तव्य भवेत्तर्हि तदपि लौकिकपारलौकिकोभयविधश्रेयोबाधक न भवेत् । प्रत्युत एवम् अकरणे एव दोष उक्तो मनुस्मृतौ । यथा —

" अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव दारुणम् ॥ " इति ।

ईदृशनीतेराश्रयणनेव इन्द्रेणापि पूर्वं वृत्रासुरेण सह सन्धि कृत्वा पश्चादवसरे तस्य वध कृत । तथाप्यस्य प्रशसैव सर्वै कृता ।

अत्र शासनसस्थया इदम् अवश्यम् अवधातव्यम् यत्—तयेर्ष्यावशाद् द्वेषेण वा निरपराध-व्यक्तिषु कदाप्युपाशुदण्डप्रयोगो न कर्तव्य इति । यतो हि—विकीर्णशक्ते. निर्बलाया जनताया स्वरक्षार्थं शासनसस्थाया बलसवर्धन कर्तव्यम् इति यो नीतिमार्ग उपदिष्टस्तस्येद न प्रयोजन यत्—शासनसस्थया जननाबाधिकया भाव्यम् इति । सर्वेषा पुरत शिष्टा सन्तो ये खलु गुप्तापराधिनस्तेषूपाशुदण्डप्रयोगो यथा शासनसस्थया क्रियते, तथैव तादृश-प्रयोग-शक्ति जनताया हस्तेऽपि निहिता वर्तते भारतीय-राजनीत्यनुसारेण । अत एवाचार्यचाणक्ये सम्राजोऽपि नन्दस्य उपर्युपाशु दण्डप्रयोगकरणम् अनिवार्यतया आपतितम् इति इतिहासतो ज्ञायते । तथापि यावच्छक्ति गुप्तापराधिनाम् अपराध प्रकाशम् आनीय प्रकाशदण्डविधानम् एव श्रयस्करम् इति भारतीय-राजनीतेर्मतम् । तत्रापि यदीदृशाना दण्ड अन्येन क्रियेत, तदा तज्ज्ञानेऽपि शासन-सस्थाया उपेक्षैव समुचिता नीतिरित्युक्तम् । अत्र विषये कीचकस्य इतिहास उदाहरणम्—राज्ञो विराटस्य श्यालक कीचक शक्तिशालितया तस्यान्त-शत्रुरेवासीत् । एकदा सैरन्ध्री-नाम्ना राज्ञो गृहे एकवर्षपर्यन्त सेवा-करणार्थम् आगताया द्रौपद्या उपर्यस्य कुदृष्टि पतिता । सैरन्ध्र्या अपि "मम पतय पञ्च गन्धर्वा गुप्तरूपेण मद्-रक्षा कुर्वन्तीति प्रसिद्धि कृताऽऽसीत् । तथापि तस्या अनुगमन कीचकेन न त्यक्तम् । विषयोऽय सैरन्ध्र्या राज्ञ सविधे निवेदितस्तथापि तत्रोपेक्षैव कृता राज्ञा । तया च कीचकस्य लालसाऽत्यन्त वृद्धि गता । तस्या परिणामस्तु गन्धर्व-व्याजेन भीमेन कृत तस्य हननम् एव ।

अनेन सन्दर्भेण-कीचकविषये विराटस्य सर्पछुछुन्दर्योरिव दशाऽऽसीद् इति ज्ञायते । कीचकस्य राज्यान्निष्कासनम् अपि अशक्यम् आसीत्तस्य सबन्धोऽप्यभीष्टो नासीत् । अनस्तेन स्वयमुपाशुदण्डप्रयोगम् अकृत्वा द्रौपदी-निवेदनस्योपेक्षयैव कार्यसिद्धिर्निश्चिता, यतो द्रौपद्या वचनेन तस्या पत्युर्गन्धर्वात् कीचकस्य प्राणहानिरवश्य भविता इति पूर्वमेव ज्ञातमासीत् ।

अत्र राज्ञा कृतोपेक्षा नोचितेति केचिद् अक्षिपन्ति । पर कीचकस्य

नीति-प्रयोगे कामन्दकदत्तम् उपेक्षा-स्थानम् ।

उपांशु-दण्ड-रूपेण नीतिमूलिकैव साऽऽसीत् । उपेक्षाद्वारा भीमहस्तात् तन्मरणस्य प्रतिरोध दूरीकृत्य, विना दण्डभङ्ग सर्प-मारणस्य उपायोऽनुसृतो राज्ञा । ईदृश-नीति-मार्गानुसरणेन विराट स्वय कण्टक-रहित' श्यालक-वधात् समाविताल्लोकापवादात् मुक्तश्चाभूत । नीति-प्रयोगे उपेक्षाया अपि स्थान प्रदत्त कामन्दकेन, यथा —

'साम दान च भेदश्च दण्डश्चेति चतुष्टयम् ।
मायोपेक्षेन्द्रजाल च सप्तोपाया प्रकीर्तिता ॥" इति ।

सत्त्वप्रधानेर्वीरै स्वभावत. प्रयुज्यमाना सामादयोऽत्यन्त महत्त्व-पूर्णा भवन्ति । तेष्वपि विशेषत उपेक्षाया एव प्रयोगो दैवीसपद्युक्ते. क्रियते ।

शरच्चन्द्राणामिव मानवसमाजाय आनन्दामृत पाययता सज्जनाना निन्दा प्रकृत्यैवेर्ष्यया दुष्टं क्रियते । पर ते तु योगसिद्धान्तानुसारेण तद्विरुद्ध क्षमाव्रतम् एवानुतिष्ठन्ति । तेन च दुष्टैरिमे दुर्बला इति मत्वा पुन पुनरधिकतया क्लेशो दीयते । किंतु सताम् उपेक्षैव तावद्दुष्टजन-विरोधार्थं काचन तटस्था व्यक्ति कामपि घटना वा समुपस्थापयति । तेन दुष्टाना शिक्षा अन्यत एव भवति । दुष्टकार्यदर्शनेन सज्जनान् विहाय अन्येषा क्रोधोद्भूत स्वाभाविक । तस्यैव क्रोधस्य अतिरेके सति विना हत्या तच्छान्तिर्न भवति । अत एव नृसिंहेन हिरण्यकशिपो आन्त्रा-ण्यपि निष्कार्य मालारूपेण धृतानि । भीमेन अपि दु शासनस्य हृदय विदार्य क्रोधवशात तद्रक्त-प्राशनम् आरब्धम् । अनयो क्रोधस्य परा काष्ठा दृष्ट्वा क्रमेण लक्ष्मीर्द्रौपदी चात्यन्त भयाक्रान्ते आस्ताम् ।

भावप्रकाशने क्रोधस्य श्रेणयो निरूपिता. । यथा —

" प्रथमा निन्दति गुणान् द्वितीया परुष वदेत् ।
तन्नाशोपायचिन्तैव तृतीया समुदाहृता ॥
चतुर्थ्या हननेच्छा स्यात् पञ्चम्यामायुधग्रह: ।
षष्ठया निहन्ति वेगेन विघ्नैरपि निवारित ॥
सप्तम्यां निहतस्यास्क्यानमान्त्रापकर्षणम् ॥" इति ।

दुष्ट-क्षत्रिय-निग्रहार्थं परशुरामस्य शस्त्र-धारणम् ।

क्रोधस्य सप्तभिरवस्थाभिर्यदा लोके दुष्टाना दण्डस्य मार्ग प्रकृत्या नियतो वर्तते, तदा सज्जनाना क्षमाव्रतत्यागस्यावश्यकतैव कुतो भवेत् ? एतादृशोऽपि समय कदाचिद् भवति, यदा सत्तामेव बाहुल्य लोके भवति। तदानी क्षमाव्रत परित्यज्य दुष्टनिग्रहार्थं स्वय शस्त्रग्रहण तेषा कर्तव्यतया समापतति। एतस्योदाहरण तु त्रेतायुगे दुष्टाना क्षत्रियाणा निग्रहार्थं परशुरामस्य शस्त्रधारणम्। चतुर्ष्वपि युगेषु कलियुगमेवात्यन्त श्रेयस्कर, यत्र सज्जनाना दुष्टनिग्रहार्थं शस्त्रग्रहणस्य आवश्यकतैव न भवति, यत्र सर्वत्र रौद्रप्रकृतिकाना बाहुल्यात् तेष्वेव परस्पर कलहेन एतेषा क्षमाव्रत निर्विघ्न भवति।

एव रीत्या प्रमाणत्रयसमन्वयेन लौकिक-पारलौकिकोभयविध्र-श्रेयोदृष्टया च भारतीय-राजनीतौ सामाद्युपायाना यथोचितो व्यवहार उक्त। एतदतिरिक्ता काचन नीति पाश्चात्य-नीतौ नोपलभ्यते। एते-षाम् एव किञ्चिद्-वैलक्षण्येन प्रयोगास्तत्र दृश्यते।

अथ कस्योपायस्य कदा कुत्र प्रयोग कर्तव्य ? इत्ययम् अवशि-ष्टोऽशो विचार्यते। येन भारतीयराजनीते षष्ठी विशेषता अद्यतनपरि-स्थितौ कस्योपायस्य अवलम्बन सफल भविष्यतीति च ज्ञायेत।

पूर्वोक्ता सामादयश्चत्वार उपाया यदि क्रमेण प्रयुज्येरस्तर्हि तेऽनुलोमप्रयोगसज्ञका भवन्ति। यदि च तेषा वैपरीत्येन प्रयोग क्रियते, तर्हि ते प्रतिलोम-प्रयोग-पदवाच्या भवन्ति। एतेषा क्रमेणाहत्य त्रिंशद्भेदा भवन्ति। तथा हि विषयभेदेन एतेषा पृथक् पृथक् प्रयोगा भवन्तीति चत्वारः। तत्र यद्येकस्यामेव व्यक्तौ सामदानयो सामभेदयो सामदण्डयो दानभेदयोः दानदण्डयो भेददण्डयोश्च प्रयोग प्रसज्येत तदा षट्। यदि च एकत्रैव क्रमेण त्रयाणा मेलनेन प्रयोग क्रियेत, तदा चत्वार। एकत्रैव चतुर्णामपि प्रयोगे एक इति मिलित्वाऽऽनुलोम्येन प्रयोगे पञ्चदश भेदा भवन्ति। एवमेव प्रातिलोम्ये पञ्चदश ज्ञेया।

तत्र कस्य प्रयोगस्य को विषयो भवतीति विचारो विस्तरेण नीतिसारे प्रतिपादित —

" अलस विक्रमे क्षान्त विहतोपायचेष्टितम् ।
क्षयव्ययप्रवासैश्च श्रमेण विपरिद्रुतम् ॥
भीरु मूर्खं स्त्रिय बाल धार्मिक दुर्जन पशुम ।
मंत्रीप्रधान कल्याणबुद्धि सान्त्वेन साधयेत् ॥ "

एव—" लुब्ध क्षीण च दानेन "— इत्यादिना ।

स्वकर्तव्यपरायणानाम् आदरः कर्तव्य एव भवति ।

तत्र ये खलु स्वकर्तव्यपरास्तेषामादर कर्तव्य एव भवति । अन्यथा ते शासनसस्था प्रति उदासीना भविष्यन्ति । अत सामैव तेषा वशीकरणे उपयुक्त भवति । लुब्धास्तु सदा धनाशयैव युक्तास्तिष्ठन्ति, अतस्ते धनलोभेन शत्रुपक्षमाश्रित्य शासनव्यवस्थाया क्षतिकारका भविष्यन्तीति तेभ्यो द्रव्यदानम् आवश्यकम् । ये खलु राज्यविरुद्ध सघटन कृतमस्ति, तेषु भेदप्रयोग कर्तव्य । तेषा नेतृषु ये क्रुद्धलुब्धभीतापमानिता स्युस्तेषा यथावज्ज्ञानपूर्वकम् उचितया भेदनीत्या तेष्वेव परस्पर कलह उत्पादनीय । मुद्राराक्षसे वर्णिते चाणक्य-चन्द्रगुप्तयो सवादे ज्ञाते मतीदृशप्रयोगस्य सम्यग्ज्ञान भविष्यति । दण्डस्य प्रयोगस्तु केवल दुष्टानामेव वशीकारार्थम् उपयुज्यते, यतस्तेऽन्यैरुपायैर्योग्यमार्गं आनेतु शक्या न भवन्ति ।

सानदानयो सयुक्त प्रयोग पुत्रादि-बन्धुवर्गे कर्तव्य शासनवर्गेण। सदा एतेषा स्वस्माद् विश्लेषो यथा न स्यात्तथा प्रयतितव्यम् । तदुक्त नीतिसारे —

" आत्मान प्रथम राजा विनयेनोपपादयेत् ।
ततोऽमात्यास्ततो भृत्यास्तत पुत्रास्तत. प्रजा ॥ " इति ।

अनेनेद स्पष्ट भवति, यत् - स्वपुत्राणा विनीतता-सपादन शासकानाम् अवश्यकर्तव्यमिति । यतश्च एव वशस्य राज्यस्य च समृद्धौ कारणानि भवन्ति । एव बन्धवो जन्म-मरणादि-प्रसङ्गेषु साहाय्यकर्तारो भवन्ति । एतेषु लोभसभावनयैव सामदानयो सयुक्त प्रयोग उक्त । यद्येतैर्विरुद्धं

सघटन कृत स्यात्तर्हि तेषु दानभेदयोरपि प्रयोग आवश्यक । बन्धुबले सति शासकस्य न कुतोऽपि भय भवितुमर्हति । सामन्तानां राज्यात् परिभ्रशितानां च वशीकारार्थं भेददण्डयो सयुक्त प्रयोग कर्तव्य । एव रीत्या सर्वेषा प्रयोगाणा विचारे क्रियमाणे स्वतन्त्रो विस्तीर्णो ग्रन्थो भविष्यति । अत सक्षेपत तत्सूत्र निर्दिष्टम् ।

साराशस्तु—तत्तत्प्रसङ्गमौचित्य च ज्ञात्वा तत्तत्प्रयोगा कर्तव्या , अत्रैव वीरस्य बुद्धिमत्ताऽपेक्षिता । यथा वैद्यक-ग्रन्थेषु केवलम् अमुकरोगे अमुकम् औषध देयमिति लिखित वर्तते, पर चिकित्सकेन स्वबुद्धया सम्यङ्निदान ज्ञात्वा तत्तदुपयुक्तम् एवौषध्च देय भवति ।

अथ वर्तमान-परिस्थितौ कस्यावलम्बन सफलता-सपादने आवश्यकम् इति विविच्यते। अनेन प्रसङ्गेन इदम् अवश्य ज्ञायेत यद् वर्तमान-परिस्थितिम् आयति च सम्यग्ज्ञात्वा जागरूको नीतिज्ञ-समाजो देशसेवा-भावनया साम्प्रत विद्यासेवाया सलग्नो वर्तते । यथाशक्ति सामप्रयोग-द्वारा आलस्यादि-ग्रस्ताना व्यक्तीना स्वसिद्धान्त प्रत्याकर्षणे प्रयतते च । एव भेदद्वारा पाश्चात्याना यथार्थदोषोद्घाटनेऽपि सलग्नोऽस्ति । ईदृशानुष्ठाने बाधकान् दुष्टान प्रत्युपेक्षाया आश्रयणम् अपि कृतमनेनेति । अनेन प्रयोगेण देशे एकसूत्रनानिर्माणम् अवश्य भविष्यति, जनताया विश्वासश्चास्मिन्वर्गे वर्धतेत्यत्र न सदेहलेशोऽपि । एव रीत्या यथार्थ-स्वराज्य-सघटनार्थं जागरूको वर्णाश्रम-स्वराज्य-सङ्घानुयायी नीतिज्ञ-वर्गोऽय भारतीय-राजनीतेर्लक्ष्यानुसारेणैव प्रचलतीत्यवश्य वक्तव्यम् । नीतिसिद्धस्यैतादृशशुद्धप्रयोगस्य विषये न कस्यापि वैमत्य भवितुमर्हति । अस्यैव मार्गस्य पुष्टिर्मनुना कृता । यथा —

" सेनापत्य च राज्य च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्य च वेदशास्त्रविदर्हति ॥ " इति ।

अत्र वेदशास्त्रवित्-पद सत्त्वप्रधान-नीतिज्ञ-बोधकम् । जागरूकेण नीतिज्ञ-वर्गेण परिचालितोऽय मार्गो यथा प्रत्यक्ष-तर्काभ्या सिद्धस्तथा धर्मशास्त्रवचनरूपशब्दप्रमाणेनापि । सामदण्डयोर्विषये मनुना एवम् उक्तम् —

" सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
प्रिय च नानृत ब्रूयादेष धर्म. सनातनः ॥ "

" अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरक चैव दारुणम् ॥ "

" राजभिर्धृतदण्डा ये कृत्वा पापानि मानवा ।
निर्मला स्वर्गमायान्ति सन्त सुकृतिनो यथा ॥ " इति ।

अत्र सत्येन सह प्रियवचनस्यादेश सामप्रयोगदृष्ट्यैव कृत । प्रियत्वेन सहैव सत्यत्वस्य वचने विधानस्य सज्जनता-समाश्रयणे तात्पर्यं बोध्यम् ।

भेदविषये धर्ममूलकाचारः प्रमाणम् ।

एवमेव दानविषये — "दानेन द्विषन्तो मित्राणि भवन्ति, तस्माद् दान परम वदन्ति ।" इति श्रुति । भेदविषये धर्ममूलक आचारश्च प्रमाणम् ।

यतो हि – वेदान्तादिशास्त्रेषु परमतनिराकरणपूर्वकम् एव स्वमत-स्थापन क्रियते । इयमेव भेदनीति ।

एतावता वर्तमानपरिस्थितावावश्यक कर्तव्य निर्दिश्य एता-दृश-कर्तव्य-पथे जनता कथम् आरूढा भवेदिति विमृश्यते। येन देशे मुख्य-लक्ष्यस्य साधनमपि सुनिश्चित भविष्यति । वस्तुतोऽधुना सर्वेषा नीति-ज्ञाना पुरत प्रश्नोऽय समुपस्थितो वर्तते ।

अत्र विषये भारतीय-राजनीतौ प्रमाणत्रय-समन्वयेनेदम् उक्तम्, यत् —

" तत्राय प्रथमोपायो यद्विद्यावृद्धै साधं विद्याचिन्ता, विद्याप्रति-बद्धत्वाल्लोकस्थिते इति । विद्याया लोकस्य च कीदृश सबन्धो वर्तते ? इति पूर्वं ज्ञातेऽस्य वचनस्य तात्पर्यं स्पष्ट भवेत् । श्रीशङ्कराचार्यैर्हि— " **नीतिरस्मि जिगीषताम्** " इति गीताव्याख्यानावसरे " विजयोपाय-

प्रदर्शन नीत्या क्रियते " इत्युक्तम् । किं च तैरेव " **जयोऽस्मि व्यवसायोऽस्मि ।** " इत्यत्र " **विजयश्च स्वोत्कर्षरूप ।** " इति प्रतिपादितम् । एव कियताशेन स्वोत्कर्षं साधित इत्यपि नीत्यैव ज्ञातु शक्यम् । यदि स्वकृतस्यादेशस्य उल्लङ्घन केनापि न क्रियेत, स सर्वं पाल्येत च, तावता स्वोत्कर्षस्य फल प्रत्यक्षसिद्ध भवति ।

एतादृशादेशप्रयोजकमान्यता गता पञ्चधा विभक्ता मनुना —

" वित्त बन्धुर्वय कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ " इत्यनेन ।

अत्र घनिका अपि सघटितस्य बन्धुवर्गस्यानुगामिनो भवन्ति, सोऽप्यनुभवशालिना वृद्धानाम् अनुगामी । वृद्धा अपि स्वय कार्य-करण-सामर्थ्याभावात् कर्मिणाम् अधीना भवन्ति । कर्मिणामपि विषम-प्रसङ्गे विदुषामाश्रयण कर्तव्य भवति । अत उत्तरोत्तर मान्यताधिक्य बोध्यम् ।

स्वोत्कर्षस्थापनार्थं सर्वनेतृत्वभारः विद्वद्धस्ते ।

एव रीत्या स्वोत्कर्षस्थापनार्थं सर्वनेतृत्वस्य भारो विदुषा हस्ते निक्षिप्तो वर्तते । अतो यथार्थस्वराज्यस्थापनार्थं राष्ट्रप्रकृत्यनुकूल-विद्या-निष्णाताना देशसेविना विदुषा समूहस्याधिक्येन निर्माण प्रथमतोऽपेक्षित-मस्ति । विद्याबलसवर्धनस्येव राजनीतावपेक्षिताना बहुविधाना कार्याणा मध्ये सन्मित्र-लाभस्याप्यत्यन्त महत्त्वपूर्ण स्थान वर्तते, यतो ह्येकाकिना सर्वं कार्यं कर्तुं न पार्यते । मित्रत्वस्यायमेवादर्शो यन्मित्रहितोद्देशेन स्वप्राणसमर्पणेऽपि सदा सन्नाह्य । तदुक्तम् —

" सस्तम्भयति मित्राणि ह्यमित्र नाशयत्यपि ।
भूकोषदण्डैर्व्रजति प्राणैरप्युपकारिताम् ॥ " इति ।

एतादृशमित्रसपादने सत्त्वस्य विद्यायाश्च महान् उपयोगो भवति, विश्वा-समूलभूतत्वात्तयो । सन्मित्रलाभे सति अपेक्षितानाम् अन्येषा समस्तसाध-

* *

यस्मिन् विश्वासमायाति विभूतेः पात्रमेव सः ।

* *

नानाम् अपि लाभ सहजत एव भवति । यस्मिन् विश्वासभूमिका स्थिरा भवति, तेन आवश्यकतानुसारेण यथेच्छ धनादीना सचय कर्तु शक्य । तदुक्तम् —" **यस्मिन् विश्वासमायाति विभूते पात्रमेव सः ।** " इति । चाणक्येनापि अर्थशब्दव्याख्याया विद्याया मित्रस्य च परिगणन कृतम् । तत्रापि विद्यायै प्रथम स्थान दत्वा अन्ते मित्रस्य कथन, साधनसमुच्चयेन तदेव सहायक भवतीति द्योतनार्थम । तदुक्तम्—" विद्या-भूमि-हिरण्य-पशु-धान्य-भाण्डोपस्कर-मित्रादीनाम् अजनम् अर्जितस्य विवर्धनमर्थं । इति ।

अत साम्प्रत देशे सर्वेषु कर्तव्यपरताया उत्पादनार्थं राष्ट्रप्रकृत्यानुकूल्येन विद्याया यथावत्प्रचारे प्रयत्नो विधेय इत्यायाति । यथावत्प्रचारण च, राष्ट्रान्तर्गताना विद्यार्थिना चित्ते विलासिताया मदमानयोश्च निरोधपूर्वक देशसेवाभावनया विद्यासपादने सलग्नता-सपादनानुकूलो व्यापार । पाश्चात्यप्रणाल्या प्रचाल्यमाना वर्तमानशिक्षा त्वत्यन्त नीतिविरुद्धा, यतस्तत्र छात्रेषूच्छृङ्खलताविलासिताभिमानज्ञानहीनत्वादीना दुर्गुणाना प्रोत्साहनमेव भवति । किं च तत्र उत्पद्यमाना विनयहीनता पूर्वोक्तसत्त्वगुणस्यैव मूलोच्छेदिका । विलासिता स्वभावेन च कर्तव्यपथम् आरोढु न प्रभवन्तिच्छात्रा । विलाससाधनानि तु न कदापि पूणतया सपादयितु शक्यानि । अत एव इदानी छात्रेषु विशेषतो व्याप्नुवत क्षोभस्य अनुशासनहीनतायाश्च प्रशमन दुष्कर भवति । ईदृशासतोषण तु यतो विलाससाधनाना पूर्त्याशा भवेत्तत्रैव तेषा प्रवृत्तिभविष्यति । ततश्च तत्र शत्रुणा भेदप्रयोगस्य अवसर सहजत एव प्राप्नोति । अत एव भारतीय-राजनीतौ यथावद् विद्याप्रचारेऽत्यन्त निभरो वर्तते ।

तत्र कीदृश-विद्याना प्रचार आवश्यक ? इति चेद् उच्यते —

१) समस्तविद्याना यथार्थबोधजनने, शत्रुभि प्रमाय्यमाणाना भ्रमकुशङ्कादीना निवारणे च समर्था तर्कविद्या आन्वीक्षिक्यपरपर्याया ।

२) स्थिरमते प्राणभूतस्य परलोकविश्वासस्य उत्पादिका वेदादि-शास्त्रविद्या त्रयी-पद-वाच्या ।

३) अर्थोत्पत्तिसाधनीभूता कृषि - पण्य - पशुपाल्य - विषयिणी वार्ता विद्या ।

४) स्वकर्तव्यस्य सुरक्षायाश्च मार्गप्रदर्शिका राजनीतिविद्या चेति चतसृणा विद्यानां मुख्यतया प्रचार आवश्यक इति ।

त्रिवर्ग-समृद्धि-संपादनार्थम् एव भारतीयराजनीतिः।

तदुक्त नीतिसारे —


" आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिं च पार्थिवः ।
तद्विद्यैस्तत्क्रियोपेतैश्चिन्तयेद् विनयान्वितः ॥
आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।
विद्याश्चतस्र एवैता लोकसस्थितिहेतवः ॥ " इति ।

एतावता विवेचनेन संक्षेपतः पाश्चात्त्य-नीतौ स्थितानां दोषाणां निराकरणोपायाः, तत्संबद्धानाम् अन्येषाम् अङ्गानां पूर्णतया निर्देशश्च भारतीय-राजनीतावुपलभ्यन्ते इत्यवगतं भवेदेव । अत अन्ते इदमेव वक्तव्यं, यत् — .

यदि राष्ट्रे धर्मार्थकामरूप-त्रिवर्ग-समृद्धेः संपादनम् अभीष्टं, तर्हि प्रथमतः सर्वाङ्ग-परिपूर्णायाः भारतीय-राजनीतेः अनुसरण-व्रत-ग्रहणं सर्वैः सचेतोभिः अवश्यं कर्तव्यम् इति । इतः परम् —

" यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ "

इति गीतावाक्यं स्मृत्वा लेखाद् अस्माद्विरम्यते । इति शम् ।



शारदा-गौरव-ग्रन्थमाला, 'शारदा', पुणे २०

पुष्पम्	लेखक	मूल्यम्
१ डॉ राजेन्द्रप्रसादचरितम	वा आ लाटकर	३ ००
२. वात्सल्यरसायनम्	डॉ श्री भा. वर्णेकर	१ ००
४ श्रीरामकृष्णपरमहंसीयम्	डॉ श्री. भा वर्णेकर	१ २५
५. बालकाना जवाहर	प विघ्नहरि भा देव	१ ००
६ श्रीमान् विन्स्टन चर्चिल	प वा ना ओदुम्बरकरशास्त्री	१ ००
७ अप्पाशास्त्री साहित्यसमीक्षा	प्रा अशोक अकलूजकर	२ ००

---

८ श्रीशिवराज्योदयम्	डॉ श्री भा. वर्णेकर	४० ००

(साहित्य अकादमी पारितोषिकम् १९७५)

---

९ 'समानमस्तु वो मन'	डॉ ग. बा पळसुले	३ ००
१० मराठी-संस्कृत-शब्दकोष।	जोशी-पराजपे-गाडगीळ	२५ ००
११ भूपो भिषक्त्व गत	प ग पा लोण्ढेशास्त्री	१ ००
१२ विनायक-वीर-गाथा	डॉ ग बा पळसुले	३ ००
१३ आङ्गल-लघु-काव्यानुवादमाला	प ल ज खरे	२.००
१४ श्रीराजयोगभाष्यम्	डॉ चि य केळये	५ ०५
१५ मुक्तक-मञ्जूषा	प दि दा बहुलीकर	२.००
१६ ललित-गीता-लहरी	प ओगेटि परीक्षित्शर्मा	१.००
१९ संस्कृत-प्रगति-पथे क तिष्ठति ?	प. ल म चक्रदेव	२ ००
२० शाङ्कर-दिग्विजय	श्रीविद्यारण्य	८ ००
२१ शिष्यलेख (चन्द्रगोमिपाद.)	डॉ प ल वैद्य	५ ००
२२ महात्म-चरितम्	प प ना पाठक	२ ००
२३ स्तोत्र-पञ्चदशी	प. म स आपटीकर	१ ००
२४ धन्येय गायनी कला	डॉ ग बा पळसुले	१ ००
२५ विवेकानन्द-चरितम्	डॉ ग. बा पळसुले	१० ००
२६. शारदा-प्रसाद	प. दत्तात्रेयशास्त्री दाणी	२ ००
२७ अरविन्दचरितम्	प यज्ञेश्वरशास्त्री	३ ००

२८	धन्योऽहं धन्योऽहम्	डॉ ग. बा पळसुले	५ ००
२९	खेटग्रामस्य चक्रोद्भव	डॉ ग. बा. पळसुले	१ ००
३०	अप्पाशास्त्रि-चरितम्	प वा. ना औदुम्बरकर	४० ००

३१.	शिवराजाभिषेकम्	डॉ श्री भा वर्णेकर	१०.००

(महाराष्ट्रशासनस्य पुरस्कारेण प्रकाशितम्)

३२	श्रीगणपति-वाक्यार्थ-महासभा	प वसन्त अनन्त गाडगीळ	५ ००
३३	अमरनाथकथा	ना रा बोडस	५ ००
३४	आचार्यचरितम्	प कुभघोण नारायणशास्त्री	२ ००
३५	श्रीगणपतिवाक्यार्थमहासभा	प वसन्त अ गाडगीळ	५ ००
३६	श्रीविष्णु-सहस्र-नाम-स्तोत्रम्	प भीमाशकर त्र्यम्बक केण्डे	२५ ००
३७	यशोधरा-महाकाव्यम्	प ओगेटि परीक्षित्शर्मा	१५ ००
३८	श्रीविष्णुसहस्रनामावलि ।	प वसन्त अ गाडगीळ	२ ००
३९	मनोबोध ।	श्रीरामदासानुदास	१ २५
४०	उपनिषन्मधु	मनोहर दिवाण	५ ००
४१.	सशयरत्नमाला	प्रा नलिनी पराडकर	१ ५०
४२	स्तोत्राष्टकम्	विद्वान् बालगणपतिभट्ट	१ ५०
४३	गणयज्ञछाग'	प्रा कमलारत्नम्	१ ००
४४	स्तोत्ररत्नमाला	प्रा ह त्र्य देसाई	१ ५०
४५	श्रीशरन्नवरात्रचम्पूः	को कृष्ण जोय्सर्	५.००
४६.	भारतीय-राजनीति-प्रकाश	प राजेश्वरशास्त्री द्रवीड	१५ ००
४७	हरिपाठ	प म स आपटीकर	२ ५०
४८	ते वय पारमीका	डॉ त्रि ना धर्माधिकारी	२ ५०

प्राप्तिस्थानम् –

शारदा'-कार्यालयः, पत्रमञ्जूषा 750 पुण्यपत्तनम् 411 030

18985

शारदा-गौरव-ग्रन्थमाला, 'शारदा', पुणे ३०

पुष्पम्	लेखकः	मूल्यम्
१. डॉ. राजेन्द्रप्रसादचरितम्	वा. आ. लाटकर	३.००
२. वात्सल्यरसायनम्	डॉ. श्री. भा. वर्णेकर	१.००
४. श्रीरामकृष्णपरमहंसीयम्	डॉ. श्री. भा. वर्णेकर	१.२५
५. बालकानां जवाहरः	पं. विघ्नहरि भा. देव	१.००
६. श्रीमान् विन्स्टनः चर्चिलः	पं.वा.ना.औदुम्बरकरशास्त्री	१.००
७. अप्पाशास्त्री : साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८. श्रीशिवराज्योदयम्	डॉ. श्री. भा. वर्णेकर	४०.००
(साहित्य अकादमी पारितोषिकम् १९७५)		
९. 'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०. मराठी-संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ	२५.००
११. भूपो भिषक्त्वं गतः	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२. विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३. आङ्ग्ल-लघु-काव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४. श्रीराजयोगभाष्यम्	डॉ. चि. त्र्यं. केळकर	५.०५
१५. मुक्तक-मञ्जूषा	पं. दि. दा. बहुलीकर	२.००
१६. ललित-गीता-लहरी	पं. ओगेटि परीक्षित्शर्मा	१.००
१९. संस्कृत-प्रगति-पथे कः तिष्ठति ?	पं. ल. म. चक्रदेव	२.००
२०. शाङ्कर-दिग्विजयः	श्रीविद्यारण्यः	८.००
२१. शिष्यलेखः (चन्द्रगोमिपादः)	डॉ. प. ल. वैद्य	५.००
२२. महात्म-चरितम्	पं. पं. ना. पाठक	२.००
२३. स्तोत्र-पञ्चदशी	पं. म. स. आपटीकर	१.००
२४. धन्येयं गायनी कला	डॉ. ग. बा. पळसुले	१.००
२५. विवेकानन्द-चरितम्	डॉ. ग. बा. पळसुले	१०.००
२६. शारदा-प्रसादः	पं. दत्तात्रेयशास्त्री दाणी	२.००
२७. अरविन्दचरितम	पं. यज्ञेश्वरशास्त्री	३.२०